In Public domain. Digitization Muthulakshmi Research Academy

Public domain. Digitization Muthulakshmi Research Acader

Public domain. Digitization Muthulakshmi Research Acader

ublic domain. Digitization Muthulakshmi Research Acad

Public domain. Digitization Muthulakshmi Research Acade

श्रीः

मध्यम-धातुरूपावलिः ।

पण्डित टी. आर्. कृष्णाचार्य संकलिता ।

कुंभघोणस्थ मध्वविलास पुस्तकालयस्य

पर्यवेक्षकेण

टी. के. वेंकोबाचार्येण

प्रकाशिता च ।

MADHYAMA DHĀTURŪPĀVALI.

Compiled

BY

Pandit T. R. KRISHNACHARYA

and Published

BY

T. K. VENKOBACHARYA,

Manager, Madhva Vilas Book Depot, Kumbakonam.

[Registered According to the Act XXV of 1867]

All Rights Reserved by the Publisher.

PRINTED AT THE
HINDI PRACHAR PRESS,
MADRAS.

Price Re. 1932. [Postage Extra.

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

R. S. Manthiram Chetty
Raja Pata Salai
Kumbakonam

TABLE OF CONTENTS.

विषयानुक्रमणिका ।

	पृष्ठम्
परिभाषाः संज्ञाश्च	१
भ्वादयः	९
अदादयः	७२
जुहोत्यादयः	१०८
दिवादयः	१२३
स्वादयः	१४२
तुदादयः	१५८
रुधादयः	१७४
तनादयः	१८९
क्र्यादयः	१९६
चुरादयः	२०९
परिशिष्टप्रकरणम्	२२२
धातूनां वर्णानुक्रमणिका	२६१
अशुद्धशोधनम्	२७०

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

PREFACE TO
MADHYAMA-DHATU-ROOPAVALI

The "Madhyama-Dhatu-Roopavali" has been prepared and published by us for the benefit of pupils studying in English Secondary Schools and Sanskrit Patasalas.

The late lamented Dr. Bhandarkar, in his *two* readers that are unrivalled had collected about four hundred and fifty verbs which are in common usage in the Sanskritic world and in the classic poetical works. Eliminating some of them, and including yet others which appeared to us to be more important, we have included in our "Madhyama-Dhatu-Roopavali" about 500 verbs.

In order to enable students to acquaint themselves in a single glance and in the same place, the forms of verbs in the active voice of the ten conjugations, we have given the relevant forms of each and every verb selected, in succession in the same context.

As in the books of Dr. Bhandarkar and of others, Mr. P. V. UPadhye, Mr. M. R. Kale etc., the forms of verbs in different conjugations are mentioned in different contexts in a scattered manner, a student has to turn over many pages in which process time more previons than gold is lost.

In our "Madhyama-Dhatu-Roopavali" however, as the verbs are numbered in the numerical order and as an alphabetical index of them is appended, a required verb can almost immediately be got at in a trice as it were. If the students of the 3rd 4th and 5th Forms would make it a point to memorise the forms, even as the declensions of Nouns, they would be greatly helped in their

In Public domain. Digitization Muthulakshmi Research Academy

studies in the higher classes. This is the service that we desire to render to the world of students or the student population.

The forms of verbs in the passive voice, etc., may be gathered from our "Brihaddhatu-Roopavali."

The following are the special features of the present work :—

(1) Strong, durable, white attractive paper is used.
(2) Easily readable bold Devanagari letters are employed.
(3) Our printers are the well-known HINDI PRACHAR PRESS of Madras.
(4) The book has been carefully planned and arranged by Pandit T. R Krishnacharya.
(5) Proof-reading and general supervision have been exercised by Pandit R. V. Krishnamacharya of the Government College (Abhinava Bhatta Bana) and Senior Sanskrit Pandit V. Sundaresa Sastry of the Native High School.
(6) An alphabetical Index of all the 500 verbs and Errata are appended.
(7) The book runs nearly to 300 pages.

A work like this will undoubtedly prove to be an indispensable supplement to the readers of Dr. Bhandarkar and an invaluable guide to the student population.

KUMBAKONAM,
1—10—1932.

T. K. Venkobacharya,
Publisher.

In Public domain. Digitization Muthulakshmi Research Academy

श्रीमङ्गलदेवतायै नमः ।

मध्यमधातु रूपावल्याः उपोद्घातः ।

उपरिनिर्दिष्टं मध्यमधातुरूपावलिनामकमिदं पुस्तकम् अङ्गलोत्तम-पाठशालासु (English Schools) संस्कृतपाठशालासु च पठितॄणां छात्राणामुपकारायेदानीमस्माभिर्विरचय्य मुद्राप्य प्रकाशितम् ।

सुगृहीतनामभिः कैलासवासिभिः डाक्तर आर्.जी. भाण्डरकारमहाशयैः लोके काव्यादिषु प्रयुज्यमानाः सार्धचतुःशतानि धातवः स्वेन कृतयोः इतरासाध्ययोः संस्कृत-प्रथमद्वितीयपाठ्यपुस्तकयोः संगृहीताः । तेषां मध्ये कांश्चन विहाय ततोऽप्यावश्यकत्वेनास्मभ्यं रुचितान् कांश्चनान्यान्धातून् संगृह्य आहत्य पञ्चशतानि कृत्वाऽस्यां मध्यमधातुरूपावल्यां वयं संयोजितवन्तः स्मः । यदि कश्चिद्विद्यार्थी यस्य कस्यापि धातोः कर्तरि दशलकाराणामपि रूपाणि ज्ञातुमिच्छेत्तदा क्षणमात्रेणैव तत्परिज्ञानं तस्य यथा स्यात्तथाऽस्मत्पुस्तके एकैकस्यापि धातोरेकैकप्रकरण एव कर्तरि दशलकाराणामपि रूपाणि विवृतानि ।

भाण्डरकारीयपुस्तकयोः, रा. रा. P. V. उपाध्ये, तथा रा. रा. M. R. काळे प्रभृतीनाम् इतरेषां पुस्तकेषु च बहूनि पत्राणि पर्यावर्त्यानेकप्रकरणावलोकनेन, स्वर्णादपि महार्घस्य बहुकालस्य व्ययं कृत्वा च ज्ञेयानि । अस्मत्पुस्तके तु एकैकस्य धातोः प्रथममारभ्य ५०० तमपर्यन्तं क्रमिकसंख्यां दत्त्वा तस्याः संख्याया धातूनां वर्णानुक्रमण्यामपि वितीर्णत्वात् अपेक्षितधातोरन्वेषणं च शीघ्रमेव भवेत् । किंच अङ्गलपाठशालासु तृतीय चतुर्थ पञ्चम कक्ष्यासु (Class or

In Public domain. Digitization Muthulakshmi Research Academy

Forms) पठितारो विद्यार्थिनः शब्दरूपावल्याः पठनवत् यदीदमपि पुस्तकं पठित्वा हृद्गतं कुर्युस्तर्हि तेषां मेट्रिक्प्रभृतिषु परिक्षासु महत्सौकर्यं भवेत् । इयमेवास्माभिः कर्तुमभिलषिता उपकृतिश्छात्राणाम् ।

धातूनां कर्मणि, भावे, सनि, णिचि, कृदन्तादिषु च रूपाणि तु अस्मदीयात् बृहद्धातुरूपावलिपुस्तकात् ज्ञातुं शक्यानि ।

अत्रत्या विशेषास्त्वेते—

(१) पत्राणि धवलानि, दृढानि, मसृणानि च ।

(२) अक्षराणि सुवाच्यानि देवनागराणि ।

(३) मुद्रणं मद्रनगरस्थे प्रसिद्धे हिन्दीप्रचार मुद्रणालये ।

(४) पुस्तकलेखकः पण्डित टी. आर्. कृष्णाचार्यः ।

(५) शोधकाः—

(a) कुंभघोणस्थ स्वदेशीयोत्तमपाठशालायाः (Native High School) संस्कृतभाषाप्रथमोपाध्यायाः ब्रह्मश्री सुन्दरेशशास्त्रिणः ।

(b) तदुपर्यपि पर्यवेक्षका :—एतन्नगरस्थ गवर्नमेण्ट कालेज गीर्वाणभाषाध्यापकाः अभिनवभट्टबाण इत्याद्यनेक बिरुदाङ्किताः पण्डित R. V. कृष्णमाचार्याः ।

(७) सर्वेषां धातूनां वर्णानुक्रमणिकायाः, मुद्रणयन्त्रस्य दूरदेशस्थतया समापतितानामशुद्धानां शुद्धिपत्रस्य च संयोजनम् ।

(८) पुस्तकपृष्ठसंख्या च किंचिन्न्यूनशतत्रयी ।

एतादृशविशेषविशिष्टमिदं पुस्तकं भाण्डर कारीययोः प्रथमद्वितीय पुस्तकयोःविवरणरूपेणस्थित्वा विद्यार्थिन उपकुर्यादिति प्रकाशकआशंसते।

इति विद्वद्वर्गदासः प्रकाशकः, वेंकोबाचार्य-कृष्णाचार्य-टोणपेकर्.

In Public domain. Digitization Muthulakshmi Research Academy

SOME OPINIONS ON

Madhyama-Dhatu-Rupavali.

1. From, Prof. P.M. MODI Esqr., M.A., PH.D., Samaldas College, Bhavnagar, 22—10—1932.

I am very thankful to you for your kind gift of Madhyama-Dhàtu-Rùpàvali. The Book is undoubtedly very useful to school students and Collegians who care to study or to improve their composition in Sanskrit. I hope the students will not fail to appreciate your labour.

---

2. From, S. S. SUKTANKAR Esqr., M.A., Professor of Sanskrit, Rajaram College, Kolhapur, 23rd October 1932.

Many thanks for your copy of the "मध्यमधातु रूपावलि". On a perusal of the book, I find that you are more than justified in claiming that it would benefit the English Secondary Schools' students.

You have been very judicious in making choice of the धातुs, and I feel sure that every student of Dr. Bhandarkar's books will find in the book a useful supplement to them. * *

---

3. From, G. H. BHATT Esqr., M.A., Professor of Sanskrit, Baroda College, Baroda, 9—11—32.

Please accept my thanks for sending a complimentary copy of your "Madhyama-Dhatu-Rupa-

In Public domain. Digitization Muthulakshmi Research Academy

vali". The arrangement of the matter is quite thorough and likely to give facility to students. Moreover the use of Paninian terminology the knowledge of which is indispensable to every critical student of Sanskrit Language adds much to the importance of the book.

I therefore strongly recommend the book to High School students for whom it is evidently designed.

---

4. From, V. M. APTE Esqr., M.A.,
Assistant Lecturer in Sanskrit,
Gujarat College, Ahmedabad, 9th November 1932.

Many thanks for the book "मध्यमधातुरूपावलिः". * * I have gone through the book carefully and I am glad to say that it is eminently suited to the needs of those for whom it is intended. The arrangement is excellent and I particularly appreciate the alphabetical index वर्णानुक्रमणी at the end.*

---

5. Krishnaji M. SHEMBAVNEKAR Esqr., [M.A.,
Senior Professor of Sanskrit,
St. Xavier's College, Bombay, 10—11—32.

Received with thanks your book, the मध्यमधातुरूपावलि. It will certainly be of great service to those who have mastered the two books of Bhandarkar. * * * *

In Public domain. Digitization Muthulakshmi Research Academy

6. From, Mahàmahopàdhyàya Vidyàvachaspati S. Kuppuswàmi Sastri Esqr., M.A., I.E.S., Professor of Sanskrit & Comparative Philology, Presidency College & Curator, Government Oriental Manuscripts Library, Madras, 16—11—1932.

I have looked through the copy of your "Madhyama-Dhátu-Rùpàvali" which you were kind enough to send me last month. I find that you have exercised considerable care and judgment in preparing this book. I am sure that it will be very useful in the hands of good Sanskrit teachers, in the higher forms of High Schools, as also in the second language classes of Colleges.

---

7. From, Ràma Pisharoti Esqr., M.A., Head of the Department of Sanskrit, Annàmalai University, Annàmalainagar, 16-11-32.

I am glad to acknowledge receipt of a copy of your Madhyama-Dhàtu-Rúpávali as also the report of the work done by the Madhva Vilasa Book Depot, Kumbakonam. I heartily join the chorus of appreciation of the very useful and valuable work your Depot has put forth in the matter of popularising the venerable epics, the Ràmàyana and the Mahábhàrata. Equally, if not more important, is the lead you have given in publishing the works of Sri Madhva and his followers.

Your Madhyama-Dhàtu-Rúpávali is a very useful publication and in that handy form will be

In Public domain. Digitization Muthulakshmi Research Academy

particularly welcome to all students of Sanskrit who may not have access to your Brihat-Dhátu-Rùpàvali.

---

ch to

8. From, R. Vásudeva Sarmá Esqr., M.A., ..., Senior Lecturer in Sanskrit and Superintendent of Studies in Indian Languages, National College, Trichinopoly and Member, Comiti Consultutif etc., Jurisprudence Indienni, Pondicherry (Fr. India).

Your book "Madhyama-Dhátu-Rüpàvali" reached me. * * *

In my opinion the book supplies a real want. The Intermediate and B. A. students would find it to be of very great help to them for Sanskrit Translation purpose and I am therefore recommending to them your book. The printing and get up is good and the price very moderate. * *

---

9. From, K. Krishnamáchàry Esqr., Principal, Sri Venkateswara Sanskrit College, Tirupathi.

Thanks for the complimentary copy of your "Madhyama-Dhátu-Rúpàvali".

On a careful perusal of the book, I am glad to testify that a long-felt want has now been filled up by your book.

Though I have your "Brihad-Dhàtu-Rúpávali" I feel sure that your present publication will be quite useful for my occasional literary activities.

There may be many others too like myself for whom the book will be of real service.

When such is the case for scholars of some [illegible]ts, the usefulness of the book in the hands of our High School students cannot be easily exaggerated. * * * The treatment followed justifies the claim made [in the preface]. If, as you say [in the preface], the pupils get by heart the forms of about half a dozen roots in each of the ten conjugations, as they do the Subanta forms [शब्दरूपावलि], he learning of Sanskrit is certainly made far easier than what it is to-day.

I hope the pandits of High Schools along with their pupils will find in the book many of their difficulties solved.

Even in Sanskrit schools, the book may serve its purpose.

The alphabetical list at the end has its own value.

---

10. From, H. D. Velánkar Esqr., M.A.,
Professor of Sanskrit,
Wilson College, Bombay, 18—11—32.

I thank you very much for a copy of "Madhyama-Dhatu-Rúpàvali" which you have recently published. It is indeed a very handy and useful book and will be greatly appreciated by the student-world.

In Public domain. Digitization Muthulakshmi Research Academy

11. From, Vishwàs G. BHAT Esqr., M.A.
Karnatak College, (Cantab),
Dharwar, 19—11—1932.

I find your "Madhyama-Dhátu-Rùpávali" eminently suited for the needs of our High School students. * * *
It is a handy and useful little book.

---

12. From, RAMENDRA MOHAN BOSE
Esqr., M.A. (Cal.), M.A. (Dac),
Senior Professor of Sanskrit & Bengali,
Feni College, Feni (Noakhali),
Examiner in Sanskrit, Calcutta University,
17th November 1932.

Many thanks for the kind presentation of your "Madhyama-Dhàtu-Rúpàvali". I have read with great care the major portion of your book and have derived much satisfaction from its perusal. You have removed a long-felt desideration of the students who, I am sure, will greatly profit by reading it.

---

13. From, Ñ. NILAKANTA PILLAI Esqr.,
M.A., (BR IV & VI)
Member of the Academic Council and of the Senate, University of Madras, Superintendent of studies in Sanskrit College of Arts, Tiruvandrum.

I have gone through your book "Madhyama-Dhàtu-Rùpàvali" and am glad to say tha it wll be

In Public domain. Digitization Muthulakshmi Research Academy

very useful to the Sanskrit students of the High School classes. * * *
I shall recommend it to my fellow teachers in the school departments.

---

14. From, P. V. RAMANUJASWAMI Esq.,
Principal, Maháràja's Sanskrit College, [M.A.,
(Vidyäsadma) Vizianagrum, 22—11—32.

I saw the "Madhyama-Dhàtu-Rúpàvali" kindly sent by you. The selection of roots is very judicious and the arrangement of their forms, very convenient. The book will certainly be very useful to students preparing for the University examinations. I have no doubt that it will become more popular than the more costly "Brihad-Dhátu-Rúpávali".

---

15. From, H. YOGANARASIMHAM Esqr.,
Principal, Maharaja's College, [M.A.,
Mysore, 22—11—32.

Many thanks for sending me a copy of the book "Madhyama-Dhátu-Rúpávali" compiled by Pandit T. R. KRISHNACHARYA.

I find that the book is very handy and valuable guide to students of Sanskrit and I congratulate you on the publication.

---

16. From, The Professor of Sanskrit,
DAYARAM JETHMAL SIND COLLEGE,
Karachi, 22—11—32.

* * *

n Public domain. Digitization Muthulakshmi Research Academ

I think it [मध्यमधातुरूपावलि] will be a veritable boon to all the students of Sanskrit grammar, specially for ready reference. It is very well arranged.

---

17. From, Mahamahopadhyaya Brahma Sri S. DANDAPANISWAMI DIKSHITAR, Lecturer in Sanskrit, Annamalai University, Chidambaram, 28—11—32.

श्री चित्सभेशाय मङ्गलम् ।

॥ मध्यमधातुरूपावली ॥

समवलोकितमिदं मध्यमधातुरूपावलीनामकं पुस्तकम् । यत्र च विद्यार्थिनामत्यन्तोपकृतये मुख्याः सर्वेऽपि धातवः प्रदर्शिताः । तेषां दशस्वपि लकारेषु रूपाणि सम्यक्प्रदर्शितानि । न ह्येतेभ्योऽन्ये धातवः प्रसिद्धप्रयोगेषु दृश्यन्ते ।

एतद्ग्रन्थपठनेन सम्यग्धारणेन च विद्यार्थिनां यावानुपकारः, तावान् समग्राया अपि सिद्धान्तकौमुद्याः पठनेन नसंभवेत्क्लेशमन्तरेति निश्चप्रचमिदमेतद्ग्रन्थसंदर्शिनाम् ।

न केवलमिदं हूणपाठशालास्वेव, संस्कृत प्रधानास्वपि पाठशालासु पाठनार्हं भवति । अतश्च पाठशालाध्यक्षशिखामणयः, पण्डितशिखामणयश्च तत्तत्पाठशालासु एतन्मध्यमधातुरूपावलीग्रन्थपाठनेन, विद्यार्थिनामुपकारसंपादनेन, एतद्ग्रन्थसंपादकयोः T. R. कृष्णाचार्य, T. K. वेङ्कोबाचार्ययोश्च परिश्रमं सफलयेयुरिति विश्वसिमि ।

इत्थम्, महामहोपाध्यायः शिव. दण्डपाणिस्वामिदीक्षितः ॥

Public domain. Digitization Muthulakshmi Research Academy

18. From, B. N. Krishnamùrti Sarmá, Esqr. [B.A., (Hons.)
Assistant Lecturer in Sanskrit,
Annámalai University, Annamalainagar, 29-11-32.

Thank you for the handy volume of your "Madhyama Dhàtu-Rùpavali". You have placed the student-population under an eternal debt of gratitude to you by this present publication of yours.

A work such as the present one needs no introduction to the persons for whom it is intended. It is undoubtedly priced very low at Re. 1 per book which is done evidently to help the student-population.

---

19. From, Prince Kerala Varma Esqr.,
Professor of Oriental Languages, [B.A., B.L.,
Maharaja's College, Eranakulam
Palace, Eranakulam, 29—11—32.

I went through the "Madhyama-Dhàtu-Rúpávali" compiled by Pandit T. R. Krishnacharya, carefully. It supplies a long-felt need, and will prove of high use to the student population. The arrangement is satisfactory, and the illustrations are happily chosen. The book will be an indispensable companion to the students, especially to the College-going students.

---

20. From, Sahithyaratnam, Saralakavi Suri, Vidyabhushana, Vidyavachaspathi, Kavyavisarada, Janagunakara, Mahavidvan K. Rajagopalachakravarty, Central College, Bangalore,
25—11—32.

In Public domain. Digitization Muthulakshmi Research Academy

भाण्डारकादि कृतिभी रचिता विविधाः कृतीः ।
पर्यालोच्य परिष्कृत्य नवीनेन पथाऽधुना ॥१॥
आङ्ग्लशाला प्रविष्टानां छात्राणां क्लेशहारिणी ।
धातुरूपावलिः श्लाघ्या कृष्णाचार्येण निर्मिता ॥२॥
विद्याशालासु सर्वत्र बालकानां कृते बुधैः ।
निर्मत्सरं परिग्राह्या पाठनीया च सादरम् ॥३॥
धातुमार्गे प्रपततां बालकानां पदे पदे ।
कृष्णाचार्यकृतिः सैषा करालंबाय जायताम् ॥४॥
कृष्णाचार्येण कलिता छात्राणां कण्ठगा सती ।
धातुरत्नावलिः सेयं यातु रत्नावलिश्रियम् ॥५॥
महीशूरमहाराजसभारत्नेन सादरम् ।
प्रशस्तिपत्रं लिखितं कृष्णाचार्याय धीमते ॥६॥

इति, सहृदयवशंवदः राजगोपालचक्रवर्ती ।

---

21. From, Prof. K. S. Trivedi Esqr.,
Professor of Sanskrit,
Maganlal Thakordas Balmukunddas Arts College,
Surat, 3-12-1932.

I have gone through your book "Madhyama-Dhátú-Roopavali" with great pleasure and have found it very useful to students studying in High Schools and Pathasalas. It is neatly printed in bold type and furnished with an index which facilitates reference. You deserve to be congratulated on the success of your effort.

n Public domain. Digitization Muthulakshmi Research Academ

22. From,
The Principal,
Maharaja's Sanskrit College, Trivandrum, 4-12-32.

Thanks. "Madhyama Dhátu-Rúpàvali" is very well planned and executed. It ought to be in the hands of every student.

---

23. From, Devendrakumar Banerji Esqr.,
Vidyaratna, [M.A.,
Senior Professor of Sanskrit, Chittagong College,
Chittagong, 6th December 1932.

I thank you very much for your kind gift of a copy of "Madhyama-Dhàtu-Rùpávali."

I have gone through the book with great interest, and have no doubt it will prove useful to young learners of Sanskrit. The get up is excellent and the selection of roots judicious.

---

24. From K. Gopalakrishnamma Esqr, M. A.
Govt. Arts, College, Rajahmundry. 28—11—32.

* * * * The verbal roots treated of in this [मध्यमधातुरूपावलि] are classified on the lines indicated by ancient Indian grammarians. Hence it can well be said that this book serves as a very useful guide to study of Sanskrit in the hands of College students.

---

25. From, Mahàmahòpádhyáya
Vásudéva Shàstri Abhyamkar
Sanskrit College, Poona.
मार्गशीर्ष शु. १२ शके १८५४ [9—12—32].

In Public domain. Digitization Muthulakshmi Research Academy

श्रीमन्तः पण्डितकृष्णाचार्याः !

भवद्भिः प्रेषितां मध्यमधातुरूपावलिमामूलादद्य पर्यैक्षिष्यहम् ।

अवेक्षणसमसमयं चेयं दशगणीस्थानां पञ्चशतसंख्यधातूनां प्रत्येकं दशसु लकारेषु त्रिषु पुरुषेषु, त्रिषु वचनेषु च नानाविधानि दुर्ज्ञेयाकाराणि च रूपाणि कुतूहलजनिकया भङ्ग्या करतलामलकवत्सम्यक्प्रदर्शयन्ती मुक्तसंशयं प्रकृतिप्रत्ययादियोजनेन क्रियापदानि सिषाधयिषूणां मनांसि सोत्साहानि करोतीत्यवगतं भवति ।

मन्ये अस्या अध्येतारोऽमहत्येवानेहसि कस्यापि धातोः कस्यापि च लकारस्य कीदृशमपि रूपं झटिति संसाधयितुं प्रभवेयुः। आङ्ग्लपाठशालासु मध्यमकक्षां प्रविश्य प्रथमत एव गीर्वाणवाणीं परिचिचीषूणां छात्राणां चाध्यापकपरिश्रममन्तरेणापि क्रियापदेषु परिचयं संपादयन्तीयं मातेव हितकारिणीति दृढं विश्वसिमि।

परिशिष्टसंयोजनेन क्रमाङ्कसहितधात्वनुक्रमणीसंयोजनेन चानुपानयोजनेनेवाव्यभिचरितहितकारिणीत्वं दृढीकृतमिति सर्वसमादरणीयमिति प्रत्येमि ॥

इति, अभ्यंकरोपाह्वः वासुदेवशास्त्री.

महामहोपाध्यायः, पुण्यपत्तनस्थ-संस्कृत-महाविद्यालय-कार्यपर्यवेक्षकः ।

Sri Vidya Press, Kumbakonam.

Public domain. Digitization Muthulakshmi Research Academy

श्रीगणेशाय नमः ।

अथ मध्यमधातुरूपावलिः ।

परिभाषाः संज्ञाश्च ।

भूवादयो धातवः । क्रियावाचिनो भ्वादयो धातु (roots) संज्ञाः स्युः ॥ ते च दशगणतया प्राचीनैर्विभक्ताः । ते गणाश्च—(१) भ्वादयः, शब्विकरणाः First conjugation. (२) अदादयः, लुग्विकरणाः Second conjugation. (३) जुहोत्यादयः, श्लुविकरणाः Third conjugation. (४) दिवादयः, श्यन्विकरणाः, Fourth conjugation. (५) स्वादयः, श्नुविकरणाः, Fifth conjugation. (६) तुदादयः, शविकरणाः, Sixth conjugation. (७) रुधादयः, श्नम्विकरणाः, Seventh conjugation. (८) तनादयः, उविकरणाः, Eighth conjugation. (९) क्र्यादयः, श्नाविकरणाः Nineth conjugation. (१०) चुरादयः, स्वार्थिकणिज्विकरणाः, Tenth conjugation. एतेषां दशानां विकरणानां मध्ये भ्वादयः दिवादयः तुदादयः चुरादयश्चेति चतुर्षु विकरणेषु ‘अङ्गानि’ अकारान्तानि भवन्ति ।

Public domain. Digitization Muthulakshmi Research Academ

एतेषामर्वाचीनैः 'प्रथमव्यूहः' First group इति व्यवहारः क्रियते । अन्ये षड्गणाः 'द्वितीयव्यूहः' Second group इति व्यवह्रियन्ते ।

यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् ।

विकरणप्रत्ययसहितानां धातूनाम् 'अङ्गम्' इति संज्ञा ॥ लकाराः (काला अर्थाश्च) Tenses and moods together दशैव भवन्ति । ते यथा—1 लट् = वर्तमानकालः, Present tense. 2 लोट् = आज्ञार्थकः, Imperative mood. 3 लङ् = अनद्यतनभूतकालः, Imperfect past tense. 4 विध्यर्थको लिङ् । Potential mood. एते चत्वारो लकाराः विकरणप्रत्ययार्हाः [सार्वधातुकलकाराः] भवन्ति । Conjugational tenses.

5 लिट् = अनद्यतनपरोक्षवृत्तिर्भूतकालः, Perfect past tense. 6 लुट् = श्वस्तनवृत्तिर्भविष्यत्कालः, First future. 7 लृट् = साधारणो भविष्यत्कालः, Second future. 8 आशीर्थको लिङ् = Benedictive mood. 9 लुङ् = साधारणो भूतकालः, Aorist. 10 लृङ् = [संकेतार्थकः] क्रियातिपत्तिरूपो भविष्यत्कालः, Conditional mood.

लिट्प्रभृतीनां षण्णां लकाराणां विकरणप्रत्यया न भवन्ति । तस्मात्ते आर्धधातुकलकाराः Non-conjugational tenses and moods.

n Public domain. Digitization Muthulakshmi Research Academ

धातूनां प्रयोगास्त्रिविधा भवन्ति (१) कर्तरि प्रयोगः Active voice, (२) कर्मणि प्रयोगः Passive voice (३) भावे प्रयोगश्चेति। Impersonal construction.

सर्वेषां लकाराणां पुरुषत्रयसूचकाः प्रत्ययाः सन्ति। प्रतिपुरुषं च वचनत्रयसूचकाः प्रत्यया भवन्ति। तेष्वस्मच्छब्दसमानार्थक उत्तमपुरुषः First person. युष्मच्छब्दसमानार्थको मध्यमपुरुषः Second person. युष्मदस्मद्भिन्नार्थकः प्रथमपुरुषः Third person. एकत्वबोधकम् एकवचनम् Singular. द्वित्वबोधकं द्विवचनम् Dual. बहुत्वबोधकं बहुवचनम् Plural.

तिप्तस्झि-सिप्थस्थ-मिब्वस्मस्, इत्येतेषां त्रयाणां त्रिकाणां (नवानां) प्रत्ययानां 'परस्मैपदम्' इति संज्ञा। एते तिङ् संज्ञकाश्च।

तातांझ-थासाथांध्व-मिड्वहिमहिङ्, इत्येतेषां त्रयाणां त्रिकाणां (नवानां) प्रत्ययानाम् 'आत्मनेपदम्' इति संज्ञा। एते तङ्संज्ञकाश्च भवन्ति।

केचन धातवः परस्मैपदप्रत्ययार्हाः (परस्मैपदिनः)। केचन आत्मनेपदप्रत्ययार्हाः (आत्मनेपदिनः) अपरे उभयपदप्रत्ययार्हाः (उभयपदिनः)।

अथादौ प्रथमव्यूहविकरणानां परस्मैपदिधातूनां दशलकाराणां परिनिष्ठिताः प्रत्ययाः प्रदर्श्यन्ते—

In Public domain. Digitization Muthulakshmi Research Academy

	एकवचनम् Singular	द्विवचनम् Dual	बहुवचनम् Plural

1 लट् Present tense.

प्रथमपुरुषे 3rd person	ति	तस्	अन्ति ।
मध्यमपुरुषे 2nd person	सि	थस्	थ ।
उत्तमपुरुषे 1st person	मि	वस्	मस् ।

2 लोट् Imperative.

प्र०	तु-तात्	ताम्	अन्तु ।
म०	O-तात्	तम्	त ।
उ०	आनि	आव	आम ।

3 लङ् Imperfect.

प्र०	त्	ताम्	अन् ।
म०	स्	तम्	त ।
उ०	अम्	व	म ।

4 विधिलिङ् Potential.

प्र०	ईत्	ईताम्	ईयुस् ।
म०	ईः	ईतम्	ईत ।
उ०	ईयम्	ईव	ईम ।

Public domain. Digitization Muthulakshmi Research Academy

5 लिट् Perfect past.

प्र०	अ	अतुस्	उस्।
म०	थ	अथुस्	अ।
उ०	अ	व	म।

6. लुट् First future.

प्र०	ता	तारौ	तारः।
म०	तासि	तास्थः	तास्थ।
उ०	तास्मि	तास्वः	तास्मः।

7. लृट् Second future.

प्र०	स्यति	स्यतः	स्यन्ति।
म०	स्यसि	स्यथः	स्यथ।
उ०	स्यामि	स्यावः	स्यामः।

8. आशीर्लिङ् Benedictive.

प्र०	यात्	यास्ताम्	यासुः।
म०	याः	यास्तम्	यास्त।
उ०	यासम्	यास्व	यास्म।

9. लुङः Aorist प्रत्ययाः सप्तविधाः।

I. तासु प्रथमा विधा। च्लेरादेशभूतस्य सिचो लोपेन।

प्र० त्। ताम्। उस्॥ म० स्। तम्। त॥ उ० अम्। व। म॥

In Public domain. Digitization Muthulakshmi Research Academy

उदाहरणम्-इण्=गतौ । प्र० अगात् । अगाताम् । अगुः ॥ म० अगाः । अगातम् । अगात ॥ उ० अगाम् । अगाव । अगाम ॥

II. द्वितीया विधा । च्लेरङादेशेन ।

प्र० अत् । अताम् । अन् ॥ म० अस् । अतम् । अत ॥ उ० अम् । आव । आम ॥

उदाहरणम्—ख्या = प्रकथने । प्र० अख्यत् । अख्यताम् । अख्यन् ॥ म० अख्यः । अख्यतम् । अख्यत ॥ उ० अख्यम् । अख्याव । अख्याम ॥

III. लुङि तृतीया विधा । च्लेश्चङादेशेन ।

द्वितीयविधावदस्या अपि प्रत्ययाः । धात्ववयवस्य द्वित्वमत्र भवतीति विशेषः ॥

उदाहरणम्—स्रु = गतौ । प्र० असुस्रुवत् । असुस्रुवताम् । असुस्रुवन् ॥ म० असुस्रुवः । असुस्रुवतम् । असुस्रुवत ॥ उ० असुस्रुवम् । असुस्रुवाव । असुस्रुवाम ॥

IV. लुङि चतुर्थी विधा । धातुभ्यः च्लेः सिचि सगागमेन ।

प्र० सीत् । सिष्टाम् । सिषुः ॥ म० सीः । सिष्टम् । सिष्ट ॥ उ० सिषम् । सिष्व । सिष्म ॥

n Public domain. Digitization Muthulakshmi Research Academ

उदाहरणम्—णम = प्रह्वत्वे शब्दे च। प्र० अनंसीत्। अनंसिष्टाम्। अनंसिषुः॥ म० अनंसीः। अनंसिष्टम्। अनंसिष्ट॥ उ० अनंसिषम्। अनंसिष्व। अनंसिष्म॥

V. लुङि पञ्चमी विधा। अनिड्भ्यो धातुभ्यः च्लेः क्सादेशेन।

प्र० सत्। सताम्। सन्॥ म० सस्। सतम्। सत। उ० सम्। साव। साम॥

उदाहरणम्—क्रुश = आह्वाने रोदने च। प्र० अक्रुक्षत्॥ अक्रुक्षताम्। अक्रुक्षन्॥ म० अक्रुक्षः। अक्रुक्षतम्। अक्रुक्षत। उ० अक्रुक्षम्। अक्रुक्षाव। अक्रुक्षाम॥

VI. लुङि षष्ठी विधा। अनिड्भ्यो धातुभ्यः च्लेः सिजादेशेन।

पूर्वोक्तासु पञ्चसु विधास्वनन्तर्भूतेभ्योऽनिड्भ्यो धातुभ्य इयं विधा भवति।

प्र० सीत्। स्ताम्। सुः॥ म० सीः। स्तम्। स्त॥ उ० सम्। स्व। स्म॥

उदाहरणम्— डुपचष् = पाके। प्र० अपाक्षीत्। अपाक्ताम्। अपाक्षुः॥ म० अपाक्षीः। अपाक्तम्। अपाक्त॥ उ० अपाक्षम्। अपाक्ष्व। अपाक्ष्म॥

In Public domain. Digitization Muthulakshmi Research Academy

VII. लुङि सप्तमी विधा । सेड्भ्यो धातुभ्यः च्लेः सिजादेशेन ॥

पूर्वोक्तासु पञ्चसु विधास्वनन्तर्भूताः सेटो धातवोऽस्यां गण्यन्ते ।

प्र० ईत् । इष्टाम् । इषुः । म० ईः । इष्टम् । इष्ट ॥ उ० इषम् । इष्व । इष्म ॥

उदाहरणम्—षिध = गत्याम् । प्र० असेधीत् । असेधिष्टाम् । असेधिषुः । म० असेधीः । असेधिष्टम् । असेधिष्ट ॥ उ० असेधिषम् । असेधिष्व । असेधिष्म ॥

10. लृङ् Conditional.

प्र० स्यत् । स्यताम् । स्यन् ॥ म० स्यस् । स्यतम् । स्यत ॥ स्यम् । स्याव । स्याम ॥

Public domain. Digitization Muthulakshmi Research Academy

श्रीः

अथ भ्वादिषु परस्मैपदिनः ।

[१] भू = सत्तायाम् । अकर्मकः । सेट् । पर० । to be; to become.

1. लट् । प्र० भवति । भवतः । भवन्ति ॥ म० भवसि । भवथः । भवथ ॥ उ० भवामि । भवावः । भवामः ॥

2. लोट् । प्र० भवतु—भवतात् । भवताम् । भवन्तु ॥ म० भव–भवतात् । भवतम् । भवत ॥ उ० भवानि । भवाव । भवाम ॥

3. लङ् । प्र० अभवत् । अभवताम् । अभवन् ॥ म० अभवः । अभवतम् । अभवत ॥ उ० अभवम् । अभवाव । अभवाम ॥

4. विधि० । प्र० भवेत् । भवेताम् । भवेयुः ॥ म० भवेः । भवेतम् । भवेत ॥ उ० भवेयम् । भवेव । भवेम ॥

5. लिट् । बभूव । बभूवतुः । बभूवुः ॥ म० बभूविथ । बभूवथुः ॥ बभूव ॥ उ० बभूव । बभूविव । बभूविम ॥

In Public domain. Digitization Muthulakshmi Research Academy

6. लुट्। प्र० भविता। भवितारौ। भवितारः॥ म० भवितासि। भवितास्थः। भवितास्थ॥ उ० भवितास्मि। भवितास्वः। भवितास्मः॥

7. लृट्। प्र० भविष्यति। भविष्यतः। भविष्यन्ति॥ म० भविष्यसि। भविष्यथः। भविष्यथ॥ उ० भविष्यामि। भविष्यावः। भविष्यामः॥

8. आशी०। प्र० भूयात्। भूयास्ताम्। भूयासुः। म० भूयाः। भूयास्तम्। भूयास्त॥ उ० भूयासम्। भूयास्व। भूयास्म॥

9. लुङ्। प्र० अभूत्। अभूताम्। अभूवन्। म० अभूः। अभूतम्। अभूत॥ उ० अभूवम्। अभूव। अभूम॥

10. लृङ्। प्र० अभविष्यत्। अभविष्यताम्। अभविष्यन्॥ म० अभविष्यः। अभविष्यतम्। अभविष्यत॥ उ० अभविष्यम्। अभविष्याव। अभविष्याम॥

[२] अत = सातत्यगमने। सक०। सेट्। पर०। to go.

1. लट्। प्र० अतति। अततः। अतन्ति॥ म० अतसि। अतथः। अतथ॥ उ० अतामि। अतावः। अतामः॥

2. लोट्। प्र० अततु-अततात्। अतताम्। अतन्तु॥ म० अत–अततात्। अततम्। अतत॥ उ० अतानि। अताव। अताम॥

Public domain. Digitization Muthulakshmi Research Academy

3. लङ् । प्र० आतत् । आतताम् । आतन् ॥ म० आतः । आततम् । आतत । उ० आतम् । आताव । आताम ॥

4. विधि० । प्र० अतेत् । अतेताम् । अतेयुः ॥ म० अतेः । अतेतम् । अतेत ॥ उ० अतेयम् । अतेव । अतेम ॥

5. लिट् । प्र० आत । आततुः । आतुः ॥ म० आतिथ । आतथुः । आत ॥ उ० आत । आतिव । आतिम ॥

6. लुट् । प्र० अतिता । अतितारौ । अतितारः ॥ म० अतितासि । अतितास्थः । अतितास्थ ॥ उ० अतितास्मि । अतितास्वः । अतितास्मः ॥ 7. लृट् । प्र० अतिष्यति । अतिष्यतः । अतिष्यन्ति ॥ म० अतिष्यसि । अतिष्यथः । अतिष्यथ ॥ उ० अतिष्यामि । अतिष्यावः। अतिष्यामः॥ 8. आशी० । प्र० अत्यात् । अत्यास्ताम् । अत्यासुः ॥ म० अत्याः । अत्यास्तम् । अत्यास्त ॥ उ० अत्यासम् । अत्यास्व । अत्यास्म । 9. लुङ् । VII. प्र० आतीत् । आतिष्टाम् । आतिषुः । म० आतीः । आतिष्टम् । आतिष्ट ॥ उ० आतिषम् । आतिष्व । आतिष्म ॥ 10. लृङ् । प्र० आतिष्यत् । आतिष्यताम् । आतिष्यन् ॥ म० आतिष्यः । आतिष्यतम् । आतिष्यत ॥ उ० आतिष्यम् । आतिष्याव । आतिष्याम ॥

[३] अट=गतौ ॥ सक० । सेट् । पर० । to wander ; to ramble. अत (२) धातुवत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

[४] अण = शब्दे । सक० । सेट् । पर० । to sound. अत (२) धातुवत् ॥

[५] अल = भूषणपर्याप्तिवचनेषु । to adore ; to be able ; to prevent. अत (२) धातुवत् ॥

[६] चिती (चित्) = संज्ञाने । अक० । सेट् । पर० । to think ; to notice ; to uuderstand. 1. लट् । प्र० चेतति । चेततः । चेतन्ति ॥ म० चेतसि । चेतथः । चेतथ ॥ उ० चेतामि । चेतावः । चेतामः ॥ 2. लोट् । प्र० चेततु-चेततात् चेलताम् । चेतन्तु ॥ म० चेत—चेततात् । चेततम् । चेतत ॥ उ० चेतानि । चेताव । चेताम ॥ 3. लङ् । प्र० अचेतत् । अचेतताम् । अचेतन् ॥ म० अचेतः । अचेततम् । अचेतत ॥ उ० अचेतम् । अचेताव । अचेताम ॥ 4. विधि० । प्र० चेतेत् । चेतेताम् । चेतेयुः ॥ म० चेतेः । चेतेतम् । चेतेत ॥ उ० चेतेयम् । चेतेव । चेतेम ॥ 5. लिट् । प्र० चिचेत । चिचिततुः । चिचितुः ॥ म० चिचेतिथ । चिचितथुः । चिचित ॥ उ० चिचेत । चिचितिव । चिचितिम ॥ 6. लुट् । प्र० चेतिता । चेतितारौ । चेतितारः ॥ म० चेतितासि । चेतितास्थः । चेतितास्थ ॥ उ० चेतितास्मि । चेतितास्वः । चेतितास्मः ॥ 7. लृट् । प्र० चेतिष्यति । चेतिष्यतः । चेतिष्यन्ति ॥

n Public domain. Digitization Muthulakshmi Research Academ

म० चेतिष्यसि । चेतिष्यथः । चेतिष्यथ ॥ उ० चेतिष्यामि । चेतिष्यावः । चेतिष्यामः ॥ 8. आशी० । प्र० । चित्यात् । चित्यास्ताम् । चित्यासुः ॥ म० चित्याः । चित्यास्तम् । चित्यास्त ॥ उ० चित्यासम् । चित्यास्व । चित्यास्म ॥ 9. लुङ् VII. प्र० अचेतीत् । अचेतिष्टाम् । अचेतिषुः ॥ म० अचेतीः । अचेतिष्टम् । अचेतिष्ट ॥ उ० अचेतिषम् । अचेतिष्व । अचेतिष्म । 10. लृङ् । प्र० अचेतिष्यत् । अचेतिष्यताम् । अचेतिष्यन् ॥ म० अचेतिष्यः । अचेतिष्यतम् । अचेतिष्यत ॥ उ० अचेतिष्यम् । अचेतिष्याव । अचेतिष्याम ॥

[७] खिट = त्रासे । अक० । सेट् । पर० । to fear. चिती (६) धातुवत् ॥

[८] तिल्ल = गतौ । सक० । सेट् । पर० । to go. चिती (६) धातुवत् ॥

[९] षिध = गत्याम् । सक० । सेट् । पर० । to go. चिती (६) धातुवत् । 5. लिट् । प्र० सिषेध । सिषिधतुः । सिषिधुः ॥ म० सिषेधिथ । सिषिधथुः । सिषिध ॥ उ० सिषेध । सिषिधिव । सिषिधिम ॥ 9. लुङ् । VII. प्र० असेधीत् । असेधिष्टाम् । असेधिषुः ॥ म० असेधीः ॥ उ० असेधिषम् ॥

[१०] जिमु (जिम्) = भक्षणे । सक० । सेट् । पर० । to eat. चिती (६) धातुवत् ॥ 1. लट् । जेमति ॥ 5. लिट् । जिजेम । जिजिमतुः । जिजिमुः ॥ 9. लुङ् । VII. अजेमीत् । अजेमिष्टाम् ॥

[११] मिषु (मिष्) = सेचने । सक० । सेट् । पर० । to sprinkle; to wet. चिती (६) धातुवत् ॥

[१२] बुध = अवगमने । सक० । सेट् । पर० । to make known; to inform; to teach.

1. लट् । प्र० बोधति । बोधतः । बोधन्ति ॥ म० बोधसि । बोधथः । बोधथ ॥ उ० बोधामि । बोधावः । बोधामः ॥ 2. लोट् । बोधतु—बोधतात् । बोधताम् । बोधन्तु ॥ म० बोध—बोधतात् । बोधतम् । बोधत ॥ उ० बोधानि । बोधाव । बोधाम ॥ 3. लङ् । प्र० अबोधत् । अबोधताम् । अबोधन् । म० अबोधः । अबोधतम् । अबोधत ॥ उ० अबोधम् । अबोधाव । अबोधाम ॥ 4. विधि० । प्र० बोधेत् । बोधेताम् । बोधेयुः ॥ म० बोधेः । बोधेतम् । बोधेत ॥ उ० बोधेयम् । बोधेव । बोधेम ॥ 5. लिट् । प्र० बुबोध । बुबुधतुः ॥ बुबुधुः ॥ म० बुबोधिथ । बुबुधथुः । बुबुध ॥ उ० बुबोध । बुबुधिव । बुबुधिम ॥ 6. लुट् । प्र० बोधिता । म० बोधितासि ॥ उ० बोधितास्मि ॥ 7. लृट् । बोधिष्यति ॥ 8. आशी० । बुध्यात् । बुध्यास्ताम् ।

Public domain. Digitization Muthulakshmi Research Academy

बुध्यासुः ॥ 9. लुङ् । VII. प्र० अबोधीत् । अबोधिष्टाम् । अबोधिषुः ॥ 10. लृङ् । अबोधिष्यत् ॥

[१३] कुच = शब्दे तारे । संपर्चनकौटिल्यप्रतिष्टंभविलेखनेषु च । सक० । अक० । सेट् । पर० । to cry sharply; to contract; to bend; to be crooked; to write. बुध (१२) धातुवत् ॥ 5. लिट् । चुकोच । चुकुचतुः ॥

[१४] कुजु (कुज्) = स्तेयकरणे । सक० । सेट् । पर० । to steal; बुध (१२) धातुवत् ॥ 5 लिट् । चुकोज ॥

[१५] पुष = पुष्टौ । सक० । सेट् । पर० । to nourish. बुध (१२) धातुवत् ॥

[१६] प्रुषु (प्रुष्) = दाहे । सक० । सेट् । पर० । to burn. बुध (१२) धातुवत् ॥ 5 लिट् । पुप्रोष । पुप्रुषतुः ॥

[१७] शुच = शोके । अक० सेट् । पर० । to bewail. बुध (१२) धातुवत् ॥

[१८] च्युतिर् (च्युत्)=क्षरणे । सक० । सेट् । पर० । to ooze. बुध (१२) । धातुवत् ॥ 5. लिट् । प्र० । चुच्योत । चुच्युततुः । चुच्युतुः ॥ म० चुच्योतिथ । चुच्युतथुः । चुच्युत ॥ उ० चुच्योत । चुच्युतिव । चुच्युतिम । 8. आशी० । च्युत्यात् । च्युत्यास्ताम् ॥ 9. लुङ् । VII.

In Public domain. Digitization Muthulakshmi Research Academy

प्र० अच्योतीत् । अच्योतिष्टाम् । अच्योतिषुः ॥ पक्षे— अङ् । II. प्र० अच्युतत् । अच्युतताम् । अच्युतन् ॥ म० । अच्युतः । अच्युततम् । अच्युतत ॥ उ० अच्युतम् । अच्युताव । अच्युताम ॥

[१९] दुहिर् (दुह्) = अर्दने । सक० । सेट् । पर० । to injure; to hurt. च्युतिर् (१८) धातुवत् ॥ 5. लिट् । प्र० दुदोह । दुदुहतुः । दुदुहुः ॥ म० दुदोहिथ । दुदुहथुः । दुदुह ॥ उ० दुदोह । दुदुहिव । दुदुहिम ॥ 9. लुङ् । VII. अदोहीत् ॥ पक्षे—II. अदुहत् ॥

[२०] तुहिर् । सर्वं दुहिर् (१९) धातुवत् ॥

[२१] घुषिर् (घुष्) = अधिके शब्दे । सक० । सेट् । पर० । to sound loudly; to proclaim; to declare. च्युतिर् (१८) धातुवत् ॥ 5. लिट् । जुघोष । जुघुषतुः ॥

[२२] वृषु = सेचने । सक० । सेट् । पर० । to rain; to sprinkle. 1. लट । वर्षति ॥ 2. लोट् । वर्षतु-वर्षतात् ॥ 3. लङ् । अवर्षत् ॥ विधि० वर्षेत् ॥ 5. लिट् । प्र० ववर्ष । ववृषतुः । ववृषुः ॥ म० ववर्षिथ । ववृषथुः । ववृष ॥ उ० ववर्ष । ववृषिव । ववृषिम ॥ 6. लुट् । वर्षिता ॥ 7. लृट् । वर्षिष्यति ॥ 8. आशी० । वृष्यात् ।

n Public domain. Digitization Muthulakshmi Research Academ

वृष्यास्ताम्। वृष्यासुः॥ 9. लुङ् VII. अवर्षीत्। अवर्षिष्टाम्। अवर्षिषुः॥ 10. लृङ्। अवर्षिष्यत्॥

[२३] वृषु = (घृषु) संघर्षे। स्पर्धायां च। सक०। सेट्। पर०। to rub; to grind; to pound. वृषु (२२) धातुवत्॥

[२४] हृषु (हृष्) = अलीके। अक०। सेट्। पर०। to tell a lie. वृषु (२२) धातुवत्॥

4 [२५] गद् = व्यक्तायां वाचि। सक०। सेट्। पर०। to speak. प्र० 1. लट्। प्र० गदति। गदतः। गदन्ति। म० गदसि। गदथः। गदथ॥ उ० गदामि। गदावः। गदामः॥ 3. लोट्। प्र० गदतु—गदतात्। गदताम्। गदन्तु॥ म० गद—गदतात्। गदतम्। गदत॥ उ० गदानि। गदाव। गदाम॥ 2. लङ्। प्र० अगदत्। अगदताम्। अगदन्॥ म० अगदः। अगदतम्। अगदत॥ उ० अगदम्। अगदाव। अगदाम॥ 4. विधि०। प्र० गदेत्। गदेताम्। गदेयुः॥ म० गदेः। गदेतम्। गदेत॥ उ० गदेयम्। गदेव। गदेम॥ 5. लिट्। प्र० जगाद। जगदतुः। जगदुः॥ म० जगदिथ। जगदथुः। जगद॥ उ० जगाद-जगद। जगदिव। जगदिम॥ 6. लुट्। प्र० गदिता॥ म० गदितासि॥ उ० गदितास्मि॥

In Public domain. Digitization Muthulakshmi Research Academy

7. लृट् । गदिष्यति ॥ 8. आशी० । गद्यात् । गद्यास्ताम् । गद्यासुः ॥ 9. लुङ् । VII. प्र० अगादीत् । अगादिष्टाम् । अगादिषुः ॥ म० अगादीः । अगादिष्टम् । अगादिष्ट ॥ उ० अगादिषम् ।अगादिष्व । अगादिष्म ॥ पक्षे–प्र० अगदीत् । अगदिष्टाम् । अगदिषुः ॥ म० अगदीः । अगदिष्टम् । अगदिष्ट ॥ उ० अगदिषम् । अगदिष्व । अगदिष्म ॥ 10. लृङ् । अगदिष्यत् ॥

[२६] भण = शब्दे । सक० । सेट् । पर० । to speak. गद (२५) धातुवत् ॥

[२७] गज = शब्दे । सक० । सेट् । पर० । to sound ; to roar. गद (२५) धातुवत् ॥

[२८] ह्रस = शब्दे लाघवे च । अक० । सेट् । पर० । to sound ; to become small. गद (२५) धातुवत् ॥ 5. लिट् । जह्रास । जह्रसतुः । जह्रसुः । 9. लुङ् । VII. अह्रासीत्–अह्रसीत् ॥

[२९] ज्वल = दीप्तौ । अक० । सेट् । पर० । to shine. गद (२५) धातुवत् । 5. लिट् । जज्वाल । जज्वलतुः । जज्वलुः ॥

n Public domain. Digitization Muthulakshmi Research Academ

[३०] व्रज = गतौ। सक०। सेट्। पर०। to go. गद (२५) धातुवत्॥ 5. लिट्। वव्राज। वव्रजतुः। वव्रजुः॥ 9. लुङ्। अव्राजीत्। अव्राजिष्टाम्॥ इत्येकमेव रूपम्। न तु अव्रजीदित्यपि॥

[३१] हसे (हस्) = हसने। अक०। सेट्। पर०। to laugh; to joke. गद (२५) धातुवत्॥ 9. लुङ्। VII. अहसीत्। अहसिष्टाम्। अहसिषुः॥ न तु अहासी-दित्यादि॥

[३२] जल्प = व्यक्तायां वाचि। सक०। सेट्। पर०। to speak. गद (२५) धातुवत्॥ 5. लिट्। जजल्प। जजल्पतुः। जजल्पुः॥ 9. लुङ्। VII. अजल्पीत्। अजल्पिष्टाम्। अजल्पिषुः॥

3[३३] रक्ष = पालने। सक०। सेट्। पर०। to protect. गद (२५) धातुवत्॥ 5. लिट्। ररक्ष। ररक्षतुः। ररक्षुः॥ 9. लुङ्। VII अरक्षीत्। अरक्षिष्टाम्। अरक्षिषुः॥

[३४] नर्द = शब्दे। अक०। सेट्। पर०। to sound; to roar. गद (२५) धातुवत्। 5. लिट्। ननर्द। ननर्दतुः। ननर्दुः॥ 9 लुङ्। VII अनर्दीत्। अनर्दिष्टाम्॥

In Public domain. Digitization Muthulakshmi Research Academy

[३५] तर्द = हिंसायाम् । सक० । सेट् । पर० । to injure : to hurt ; गद (२५) धातुवत् ॥ 5. लिट् ॥ ततर्द । ततर्दतुः । ततर्दुः ॥ ९ लुङ् । VII. अतर्दीत् । अतर्दिष्टाम् । अतर्दिषुः ॥

[३६] जप – व्यक्तायां वाचि । सक० । सेट् । पर० । to speak ; mutter ; to utter in a low voice. गद (२५) धातुवत् । 5. लिट् । प्र० जजाप । जेपतुः । जेपुः ॥ म० जेपिथ । जेपथुः । जेप ॥ उ० जजाप–जजप । जेपिव । जेपिम ॥ 9. लुङ् । VIIअजपीत्–अजापीत् । अजपिष्टाम्–अजापिष्टाम् । अजपिषुः–अजापिषुः ॥

[३७] रद = भेदने । सक० । सेट् । पर० । to split ; to scratch. जप (३६) धातुवत् ॥

[३८] बद = स्थैर्ये । अक० । सेट् । पर० । to be steady. जप (३६) धातुवत् ॥

[३९] दल = विशरणे । अक० । सेट् । पर० to split ; to break. जप (३६) धातुवत् ॥

[४०] चल = कंपने । अक० । सेट् । पर० । to shake. जप (३६) धातुवत् ॥ 9. लुङ् अचालीत् ॥

Public domain. Digitization Muthulakshmi Research Academy

[४१] चर = गतौ । भक्षणे च । गतावक० । सेट् । पर० । to go ; to walk ; to graze ; to eat. जप (३६) धातुवत् ॥ 9. लुङ् । अचारीत् ॥

[४२] लप = व्यक्तायां वाचि । सक० । सेट् । पर० । to speak. जप (३६) धातुवत् ॥

[४३] वद = व्यक्तायां वाचि । सक० । सेट् । पर० । to speak. गद (२५) धातुवत् ॥ 5. लिट् । प्र० उवाद । ऊदतुः । ऊदुः ॥ म० उवदिथ । ऊदथुः । ऊद ॥ उ० उवाद–उवद । ऊदिव । ऊदिम ॥ 6. लुट् । वदिता ॥ 7. लृट् । वदिष्यति ॥ 8. आशी० । उद्यात् । उद्यास्ताम् । उद्यासुः ॥ 9. लुङ् । VII. प्र० अवादीत् । अवादिष्टाम् । अवादिषुः ॥ म० अवादीः । अवादिष्टम् । अवादिष्ट ॥ उ० अवादिषम् । अवादिष्व । अवादिष्म ॥ अत्र वृद्धिर्नित्या । अवदीत् इत्यादि नास्ति ॥

[४४] चमु (चम्) = अदने । सक० । सेट् । पर० । to eat. जप (३६) धातुवत् ॥ आङुपसृष्टे तु आचामति इत्यादि विशेषः । आर्धधातुके न दीर्घः । आचमिष्यति ॥ 9. लुङ् VII अचमीत् इत्येव ॥

10 [४५] णिदि (निन्द्) = कुत्सायाम् । सक० । सेट् । पर० । to

In Public domain. Digitization Muthulakshmi Research Academy

blame. 1. लट् । निन्दति ॥ 2. लोट् । निन्दतु ॥ 3. लङ् । अनिन्दत् ॥ 4. विधि० । निन्देत् ॥ 5. लिट् । प्र० निनिन्द । निनिन्दतुः । निनिन्दुः ॥ म० निनिन्दिथ । निनिन्दथुः । निनिन्द ॥ उ० निनिन्द । निनिन्दिव । निनिन्दिम ॥ 6. लुट् । प्र० निन्दिता ॥ म० निन्दितासि ॥ उ० निन्दितास्मि ॥ 7. लृट् । निन्दिष्यति ॥ 8. आशी० । निन्द्यात् । निन्द्यास्ताम् । निन्द्यासुः ॥ 9. लुङ् । VII. अनिन्दीत् । अनिन्दिष्टाम् । अनिन्दिषुः ॥ 10. लृङ् । अनिन्दिष्यत् ॥

[४६] टु नदि (नन्द्) = समृद्धौ । अक० । सेट् । पर० । to be glad ; to be satisfied. 1. लट् । नन्दति ॥ 2. लोट् । नन्दतु ॥ 3. लङ् । अनन्दत् ॥ 4. विधि० नन्देत् ॥ 5. लिट् । ननन्द । ननन्दतुः ॥ 8. आशी० । नन्द्यात् । नन्द्यास्ताम् । नन्द्यासुः ॥ 9. लुङ् । VII. अनन्दीत् । अनन्दिष्टाम् । अनन्दिषुः ॥ इत्यादि णिदि (४५) धातुवत् ॥

[४७] वाञ्छि (वाञ्छ्) = वाञ्छायाम् । सक० । सेट् । पर० । to desire ; to wish. नदि (४६) धातुवत् ॥ 1. लट् । वाञ्छति ॥ 2. लोट् । वाञ्छतु ॥ 3. लङ् । अवाञ्छत् ॥ 4. विधि० । वाञ्छेत् ॥ 5. लिट् ।

P. Padmanabhan

In Public domain. Digitization Muthulakshmi Research Academy

प्र० ववान्छ । ववान्छतुः । ववान्छुः ॥ म० ववान्छिथ । ववान्छथुः । ववान्छ ॥ उ० ववान्छ । ववान्छिव । ववान्छिम ॥ 6. लुट् । वान्छिता ॥ 7. लृट् । वान्छिष्यति ॥ 8. आशी० । वान्छ्यात् । वान्छ्यास्ताम् ॥ 9. लुङ् । VII. प्र० अवान्छीत् ॥ म० अवान्छीः ॥ उ० अवान्छिषम् ॥ 10. लृङ् । अवान्छिष्यत् ॥

[४८] खादृ = भक्षणे । सक० । सेट् । पर० । to eat; to devour. 1. लट् । खादति 2. लोट् । खादतु ॥ 3. लङ् । अखादत् ॥ 4. विधि० । खादेत् ॥ 5. लिट् प्र० चखाद । चखादतुः । चखादुः ॥ म० चखादिथ । चखादथुः । चखाद ॥ उ० चखाद । चखादिव । चखादिम ॥ 9. लुङ् । VII. अखादीत् । अखादिष्टाम् । अखादिषुः ॥

[४९] मथि (मन्थ्) = हिंसासंक्लेशनयोः । सक० । सेट् । पर० । to kill; to injure. नदि (४६) धातुवत् ॥

[५०] शंसु (शंस्) = स्तुतौ । सक० । सेट् । पर० । to praise. 1. लट् । शंसति ॥ 2. लोट् । शंसतु ॥ 3. लङ् । अशंसत् ॥ 4. विधि० । शंसेत् ॥ 5. लिट् । प्र० शशंस । शशंसतुः । शशंसुः ॥ म० शशंसिथ । शशंसथुः । शशंस ॥ उ० शशंस । शशंसिव । शशंसिम ॥ 6. लुट् । शंसिता ॥

In Public domain. Digitization Muthulakshmi Research Academy

7. लृट् । शंसिष्यति ॥ 8 आशी० । प्र० शस्यात् । शस्यास्ताम् । शस्यासुः ॥ म० शस्याः । शस्यास्तम् । शस्यास्त ॥ उ० शस्यासम् । शस्यास्व । शस्यास्म ॥ 9 लुङ् । VII. अशंसीत् । अशंसिष्टाम् । अशंसिषुः ॥ 10. लृङ् । अशंसिष्यत् ॥

[५१] मन्थ = विलोडने । द्विक० । सेट् । पर० । to churn; to shake. शंसु (५०) धातुवत् ॥

[५२] दंश = दशने । सक० । अनि । पर० । to bite; to sting. 1 लट् । दशति ॥ 2. लोट् । दशतु ॥ 3. लङ् । अदशत् ॥ 4. विधि० । दशेत् ॥ 5. लिट् । प्र० ददंश । ददंशतुः । ददंशुः ॥ म० ददंशिथ-ददंष्ठ । ददंशथुः । ददंश ॥ उ० ददंश । ददंशिव । ददंशिम ॥ 6. लुट् । दंष्टा ॥ 7. लृट् । दङ्क्ष्यति ॥ 8 आशी० । दश्यात् । दश्यास्ताम् ॥ 9. लुङ् । VI. प्र० अदाङ्क्षीत् । अदांष्टाम् । अदाङ्क्षुः ॥ म० अदाङ्क्षीः । अदांष्टम् । अदांष्ट ॥ उ० अदाङ्क्षम् । अदाङ्क्ष्व । अदाङ्क्ष्म ॥ 10. लृङ् । अदङ्क्ष्यत् ॥

[५३] अर्ह = पूजायाम् । सक० । सेट् । पर० । to worship; to deserve. 1. लट् । अर्हति ॥ 2. लोट् । अर्हतु ॥

Public domain. Digitization Muthulakshmi Research Academy

3. लङ् । आर्हत् । आर्हताम् । आर्हन् ॥ 4 विधि० । अर्हेत् ॥ 5. लिट् । प्र० आनर्ह । आनर्हतुः । आनर्हुः ॥ म० आनर्हिथ । आनर्हथुः । आनर्ह ॥ उ० आनर्ह । आनर्हिव । आनर्हिम ॥ 6. लुट् । अर्हिता ॥ 7. लृट् । अर्हिष्यति ॥ 8. आशी० । अर्ह्यात् । अर्ह्यास्ताम् ॥ 9. लुङ् । VII. प्र० आर्हीत् । आर्हिष्टाम् । आर्हिषुः ॥ 10. लृङ् । आर्हिष्यत् ॥

[५४] अर्द = गतौ याचने च । सक० । सेट् । पर० । to go; to beg. अर्ह (५३) धातुवत् ॥

[५५] अर्ज = अर्जने । सक० । सेट् । पर० । to procure; to earn. अर्ह (५३) धातुवत् ।

[५६] अर्च = पूजायाम् । सक० । सेट् । पर० । to worship; to honour. अर्ह (५३) धातुवत् ॥

[५७] अर्घ = मूल्ये । सक० । सेट् । पर० । to cost. अर्ह (५६) धातुवत् ॥

[५८] धेट् (धे) = पाने । सक० । अनि० । पर० । to drink. to suck. 1. लट् । प्र० धयति । धयतः । धयन्ति ॥ म० धयसि । धयथः । धयथ ॥ उ० धयामि । धयावः । धयामः 2. लोट् । प्र० धयतु–धयतात् । धयताम् । धयन्तु ॥ म०

In Public domain. Digitization Muthulakshmi Research Academy

धय–धयतात् । धयतम् । धयत ॥ उ० धयानि । धयाव । धयाम ॥ 3. लङ् । प्र० अधयत् । अधयताम् । अधयन् ॥ म० अधयः । अधयतम् । अधयत ॥ उ० अधयम् । अधयाव । अधयाम ॥ 4. विधि० । प्र० धयेत् । धयेताम् । धयेयुः ॥ म० धयेः । धयेतम् । धयेत ॥ उ० धयेयम् । धयेव । धयेम ॥ 5. लिट् । प्र० दधौ । दधतुः । दधुः ॥ म० दधिथ–दधाथ । दधथुः । दध ॥ उ० दधौ । दधिव । दधिम ॥ 6. लुट् । धाता ॥ 7. लृट् । धास्यति ॥ 8. आशी० । धेयात् । धेयास्ताम् । धेयासुः ॥ 9. लुङ् । III. प्र० अदधत् । अदधताम् । अदधन् ॥ म० अदधः । अदधतम् । अदधत ॥ उ० अदधम् । अदधाव । अदधाम ॥ पक्षे–I. प्र० अधात् । अधाताम् । अधुः ॥ म० अधाः । अधातम् । अधात ॥ उ० अधाम् । अधाव । अधाम ॥ अथवा–IV. प्र० अधासीत् । अधासिष्टाम् । अधासिषुः ॥ म० अधासीः । अधासिष्टम् । अधासिष्ट ॥ उ० अधासिषम् । अधासिष्व । अधासिष्म ॥ 10. लृङ् । अधास्यत् ॥

[५९] ध्यै = चिन्तायाम् । सक० । अनि० । पर० । to think of; to meditate; to recollect. 1. लट् । ध्यायति ॥ 2. लोट् । ध्यायतु ॥ 3. लङ् । अध्यायत् ॥ 4. विधि० । ध्यायेत् ॥ 5. लिट् । प्र० दध्यौ । दध्यतुः । दध्युः ॥ म० दध्यिथ–दध्याथ । दध्यथुः । दध्य ॥ उ० दध्यौ । दध्यिव ।

Public domain. Digitization Muthulakshmi Research Academy

दध्यिम ॥ 6. लुट् । ध्याता ॥ 7. लृट् । ध्यास्यति ॥ 8. आशी० । ध्यायात् । ध्यायास्ताम् । ध्यायासुः । पक्षे-ध्येयात् ध्येयास्ताम् ॥ 9. लुङ् । IV. अध्यासीत् । अध्यासिष्टाम् । अध्यासिषुः ॥ 10 लृङ् । अध्यास्यत् ॥

[६०] ग्लै = हर्षक्षये । क्लमे च । अक० । अनि० । पर० । to dispond; to be fatigued; to be weary. ध्यै (५७) धातुवत् ॥ 1. लट् । ग्लायति ॥ 5. लिट् । जग्लौ ॥ 8. आशी० । ग्लायात्–ग्लेयात् ॥ 9. लुङ् । IV. अग्लासीत् ॥

[६१] म्लै = हर्षक्षये । ग्लै (६०) धातुवत् ॥

[६२] श्रै = पाके । सक० । अनि० । पर० । to cook. ध्यै (५९) धातुवत् ॥

[६३] गै = शब्दे । सक० । अनि० । पर० । to sing. सार्वधातुके गायति इत्यादि ॥ 5. लिट् । प्र० जगौ । जगतुः । जगुः ॥ म० जगिथ-जगाथ । जगथुः । जग ॥ उ० जगौ । जगिव । जगिम ॥ 6. लुट् । प्र० गाता ॥ म० गातासि ॥ उ० गातास्मि ॥ 7. लृट् । गास्यति ॥ 8. आशी० । गेयात् । गेयास्ताम् ॥ लुङ् । VI. अगासीत् । अगासिष्टाम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

[६४] कै = शब्दे । सक० । अनि० । पर० । to sound. गै (६३) धातुवत् ॥

[६५] क्षै = क्षये । सक० । अनि० । पर० । to waste away. गै (६३) धातुवत् ॥

[६६] पा (पिब्) = पाने । सक० । अनि० । पर० । to drink. 1. लट् । पिबति ॥ 2. लोट् । पिबतु ॥ 3. लङ् । अपिबत् ॥ 4. विधि० । पिबेत् ॥ 5. लिट् । प्र० पपौ । पपतुः । पपुः ॥ म० पपिथ-पपाथ । पपथुः । पप ॥ उ० पपौ । पपिव । पपिम ॥ 6. लुट् । पाता ॥ 7. लृट् । पास्यति । 8. आशी० । पेयात् । पेयास्ताम् । पेयासुः ॥ 9. लुङ् । II. प्र० अपात् । अपाताम् । अपुः ॥ म० अपाः । अपातम् । अपात ॥ उ० अपाम् । अपाव । अपाम ॥ 10. लृङ् । अपास्यत् ॥

[६७] घ्रा (जिघ्र्) = गन्धोपादाने । सक० । सेट्० । पर० । to smell. जिघ्रति इत्यादि ॥ 5. लिट् । प्र० जघ्रौ । जघ्रतुः । जघ्रुः ॥ म० जघ्रिथ—जघ्राथ । जघ्रथुः । जघ्र ॥ उ० जघ्रौ । जघ्रिव । जघ्रिम ॥ 6. लुट् । घ्राता ॥ 7. लृट् । घ्रास्यति ॥ 8. आशी० घ्रायात् । घ्रायास्ताम् । घ्रायासुः ॥ पक्षे—घ्रेयात् । घ्रेयास्ताम् । घ्रेयासुः ॥ 9 लुङ् । I. प्र० अघ्रात् । अघ्राताम् । अघ्रुः ॥ पक्षे—IV. अघ्रासीत् ॥

Public domain. Digitization Muthulakshmi Research Academy

(धम्)
[६८] ध्मा = शब्दे । अग्निसंयोगे च । अक० । सेट्० । पर० । to blow; to breath; to blow fire. 1. लट् । धमति ॥ 2. लोट् । धमतु ॥ 3. लङ् । अधमत् । 4. विधि० । धमेत् ॥ 5. लिट् प्र० दध्मौ । दध्मतुः । इत्यादि घ्रा (६७) धातुवत् ॥ लुङ् IV. अध्मासीत् ॥

—तिष्ठ्)
[६९] ष्ठा (स्था) = गतिनिवृत्तौ । अक० । अनि० । पर० । to stand. 1. लट् । तिष्ठति ॥ 2. लोट् । तिष्ठतु ॥ 3. लङ् । अतिष्ठत् ॥ 4. विधि० । तिष्ठेत् ॥ 5. लिट् । प्र० तस्थौ । तस्थतुः । तस्थुः ॥ म० तस्थिथ—तस्थाथ । तस्थथुः । तस्थ । उ० तस्थौ । तस्थिव । तस्थिम ॥ 6. लुट् । स्थाता । 7. लृट् । स्थास्यति ॥ 8. आशी० । स्थेयात् । स्थेयास्ताम् ॥ 9. लुङ् । I. प्र० अस्थात् । अस्थाताम् । अस्थुः ॥ म० अस्थाः । अस्थातम् । अस्थात ॥ उ० अस्थाम् । अस्थाव । अस्थाम ॥ 10. लृङ् । अस्थास्यत् ॥

[७०] म्ना (मन्) = अभ्यासे । सक० । अनि० । पर० । to study; to repeat. मनति इत्यादि ॥ 5. लिट् । मम्नौ । मम्नतुः । मम्नुः ॥ 8. आशी० । म्नायात् । म्नायास्ताम् ॥ पक्षे—म्नेयात् । म्नेयास्ताम् ॥ 9. लुङ् । IV. अम्नासीत् : अम्नासिष्टाम् । अम्नासिषुः ॥

In Public domain. Digitization Muthulakshmi Research Academy

[७१] दाण् (दा--यच्छ्) = दाने । सक० । अनि० । to give. यच्छति इत्यादि ॥ शेषं पा (६६) धातुवत् ॥

[७२] ऋ (ऋच्छ्) = गतिप्रापणयोः । सक० । अनि० । पर० । to acquire. सार्वधातुके ऋच्छति इत्यादि । 5. लिट् । प्र० आर । आरतुः । आरुः ॥ म० आरिथ । आरथुः । आर ॥ उ० आर । आरिव । आरिम ॥ 6. लुट् । अर्ता । अर्तारौ ॥ 7. लृट् । अरिष्यति ॥ 8. आशी० । अर्यात् । अर्यास्ताम् । अर्यासुः ॥ 9. लुङ् । VI. प्र० आर्षीत् । आर्ष्टाम् । आर्षुः ॥ म० आर्षीः । आर्ष्टम् । आर्ष्ट ॥ उ० आर्षम् । आर्ष्व । आर्ष्म ॥ 10. लृङ् । आरिष्यत् ॥

[७३] दृशिर् (दृश्--पश्य्) = प्रेक्षणे । सक० । अनि० । पर० । to see. सार्वधातुके पश्यति इत्यादि । 5. लिट् । प्र० ददर्श । ददृशतुः । ददृशुः ॥ म० ददर्शिथ–दद्रष्ठ । ददृशथुः । ददृश । उ० ददर्श । ददृशिव । ददृशिम ॥ 6. लुट् । द्रष्टा ॥ 7. लृट् । द्रक्ष्यति ॥ 8. आशी० । दृश्यात् । दृश्यास्ताम् । दृश्यासुः ॥ 9. लुङ् । II. प्र० अदर्शत् । अदर्शताम् । अदर्शन् ॥ म० अदर्शः । अदर्शतम् । अदर्शत ॥ उ० अदर्शम् । अदर्शाव । अदर्शाम ॥ अङभावपक्षे–VI. प्र० अद्राक्षीत् । अद्राष्टाम् । अद्राक्षुः ॥

n Public domain. Digitization Muthulakshmi Research Academ

म० अद्राक्षीः । अद्राष्टम् । अद्राष्ट ॥ उ० अद्राक्षम् । अद्राक्ष्व । अद्राक्ष्म ॥ 10. लृङ् । अद्रक्ष्यत् ॥

[७४] सृ = गतौ । सक० । अनि० । to go; to move ; to flow. सार्वधातुके सरति इत्यादि । 5 लिट् । प्र० ससार । सस्रतुः । सस्रुः ॥ म० ससर्थ । सस्रथुः । सस्र ॥ उ० ससार—ससर । सस्रिव । सस्रिम॥ 6. लुट् । सर्ता ॥ सर्तासि ॥ 7. लृट् । सरिष्यति ॥ 8. आशी० । स्रियात् । स्रियास्ताम् ॥ 9. लुङ् । VI. प्र० असार्षीत् । असार्ष्टाम् । असार्षुः ॥ म० असार्षीः । असार्ष्टम् । असार्ष्ट ॥ उ० असार्षम् । असार्ष्व । असार्ष्म ॥ 10. लृङ् । असरिष्यत् ॥

[७५] घृ = सेचने । सक० । अनि० । पर० । to sprinkle. सृ (७४) धातुवत् । 5 लट् । घरति ॥ 5. लिट् । जघार । जघ्रतुः ॥

[७६] शद्लृ (शद्) = शातने । अक० । अनि० । to perish. अस्य सार्वधातुकलकारेषु शीय इत्यादेश आत्मनेपदं च । 1. लट् । प्र० शीयते । शीयेते । शीयन्ते ॥ म० शीयसे । शीयेथे । शीयध्वे ॥ उ० शीये । शीयावहे । शीयामहे ॥ 2. लोट् प्र० । शीयताम् । शीयेताम् । शीयन्ताम् ॥ म० शीयस्व । शीयेथाम् । शीयध्वम् ॥ उ० शीयै । शीयावहै । शीयामहै । 3. लङ् । प्र० अशीयत । अशीये-

In Public domain. Digitization Muthulakshmi Research Academy

ताम् । अशीयन्त ॥ म० अशीयथाः । अशीयेथाम् । अशीयध्वम् ॥ उ० अशीये । अशीयावहि । अशीयामहि ॥ 4. विधि० । प्र० शीयेत । शीयेयाताम् । शीयेरन् ॥ म० शीयेथाः । शीयेयाथाम् । शीयेध्वम् ॥ उ० शीयेय । शीयेवहि । शीयेमहि ॥ 5. लिट् । प्र० शशाद । शेदतुः । शेदुः ॥ म० शेदिथ—शशत्थ । शेदथुः । शेद ॥ उ० शशाद-शशद । शेदिव । शेदिम ॥ 6. लुट् । शत्ता ॥ 7. लृट् । शत्स्यति ॥ 8. आशी० । शद्यात् । शद्यास्ताम् ॥ 9. लुङ् । II. प्र० अशदत् । अशदताम् । अशदन् ॥ 10. लृङ् । अशत्स्यत् ॥

[७७] षद्लृ (सद्—सीद्) = विशरणगत्यवसादनेषु । गतौ सक० । अनि० । पर० । to divide; to break; to go; to despond! to be weary.

1. लट् । सीदति ॥ 2. लोट् । सीदतु-सीदतात् ॥ 3. लङ् । असीदत् ॥ 4. विधि० । सीदेत् ॥ आर्धधातुके ससाद । सेदतुः । इत्यादि शद्लृ (७६) धातुवत् रूपम् ॥

[७८] वस = निवासे । अक० । अनि० । पर० । to dwell. सार्वधातुके वसति इत्यादि गद (२५) धातुवत् । 5. लिट् । प्र० उवास । ऊषतुः । ऊषुः ॥ म० उवसिथ-उवस्थ । ऊषथुः । ऊष ॥ उवास-उवस । ऊषिव । ऊषिम ॥ 6. लुट् ।

Public domain. Digitization Muthulakshmi Research Academy

वस्ता । वस्तारौ ॥ म० वस्तासि ॥ 7. लृट् । वत्स्यति ॥ 8. आशी० । उष्यात् । उष्यास्ताम् ॥ 9. लुङ् । IV. प्र० अवात्सीत् । अवात्ताम् । अवात्सुः ॥ म० अवात्सीः । अवात्तम् अवात्त ॥ उ० अवात्सम् । अवात्स्व । अवात्स्म ॥ 10. लृङ् ॥ अवत्स्यत् ॥

[७९] पत्लृ (पत्)=गतौ । अक० । सेट् । पर० । to fall. सार्वधातुके पतति इत्यादि गद (२५) धातुवत् ॥ 5. लिट् । प्र० पपात । पेततुः । पेतुः । म० पेतिथ । पेतथुः । पेत ॥ उ० पपात-पपत । पेतिव । पेतिम ॥ 6. लुट् । पतिता ॥ पतितासि ॥ 7. लृट् । पतिष्यति ॥ 8. आशी० पत्यात् । पत्यास्ताम् ॥ 9. लुङ् । II. प्र० अपप्तत् । अपप्तताम् । अपप्तन् ॥म० अपप्तः । अपप्ततम् ॥ अपप्तत । उ० अपप्तम् । अपप्ताव । अपप्ताम ॥ 10. लृङ् । अपतिष्यत् ॥

[८०] गम्लृ (गम् - गच्छ्)=गतौ । सक० । अनि० । पर० । to go. 1. लट् । गच्छति ॥ 2. लोट् । गच्छतु ॥ 3. लङ् । अगच्छत् ॥ 4. विधि० । गच्छेत् ॥ 5. लिट् । प्र० जगाम । जग्मतुः । जग्मुः ॥ म० जगमिथ—जगन्थ । जग्मथुः । जग्म ॥ उ० जगाम-जगम । जग्मिव । जग्मिम ॥ 6. लुट् । गन्ता । 7. लृट् । गमिष्यति ॥ 8. आशी० । गम्यात् । गम्यास्ताम् ॥ 9. लुङ् । II. प्र० अगमत् । अगमताम् । अगमन् ॥ म०

In Public domain. Digitization Muthulakshmi Research Academy

अगमः । अगमतम् । अगमत ॥ उ० अगमम् । अगमाव । अगमाम ॥ 10. लृङ् । अगमिष्यत् ॥

[८१] सृप्लृ (सृप्) = गतौ । अक० । अनि० । पर० । to go; to creep. सार्वधातुकलकारे सर्पति इत्यादि । 5. लिट् । प्र० ससर्प ॥ ससृपतुः । ससृपुः ॥ म० ससर्पिथ । ससृपथुः ॥ ससृप ॥ ससर्प । ससृपिव । ससृपिम ॥ 6. लुट् । स्रप्ता–सर्प्ता ॥ 7. लृट् । स्रप्स्यति–सर्प्स्यति ॥ 8. आशी० । सृप्यात् । सृप्यास्ताम् ॥ 9. लुङ् । II. प्र० असृपत् । असृपताम् ॥ 10. लृङ् । अस्रप्स्यत्–असर्प्स्यत् ॥

[८२] यम (यच्छ्) = उपरमे । अक० । अनि० । पर० । to check; to stop. सार्वधातुके यच्छति इत्यादि ॥ 5. लिट् । प्र० ययाम । येमतुः । येमुः ॥ म० येमिथ–ययन्थ । येमथुः । येम ॥ उ० ययाम–ययम । येमिव । येमिम ॥ 6. लुट् । प्र० यन्ता । यन्तारौ ॥ म० यन्तासि ॥ उ० यन्तास्मि ॥ 7. लृट् । यंस्यति ॥ 8. आशी० । यम्यात् । यम्यास्ताम् ॥ 9. लुङ् । IV. प्र० अयंसीत् । अयंसिष्टाम् । अयंसिषुः ॥ म० अयंसीः । अयंसिष्टम् । अयंसिष्ट ॥ उ० अयंसिषम् । अयंसिष्व । अयंसिष्म ॥ 10. लृङ् । अयंस्यत् ॥

[८३] णम (नम्) = प्रह्वत्वे शब्दे च । सक० । अनि० । पर० ।

Public domain. Digitization Muthulakshmi Research Academy

to salute; to bow to. 1. लट् । नमति इत्यादि ॥ 5. लिट् । प्र० ननाम । नेमतुः । नेमुः ॥ म० नेमिथ–ननन्थ । नेमथुः । नेम ॥ उ० ननाम–ननम । नेमिव । नेमिम ॥ 6. लुट् । नन्ता ॥ 7. लृट् नंस्यति ॥ 8. आशी० । नम्यात् । नम्यास्ताम् ॥ 9. लुङ् । IV. प्र० अनंसीत् । अनंसिष्टाम् । अनंसिषुः ॥ म० अनंसीः । अनंसिष्टम् । अनंसिष्ट ॥ उ० अनंसिषम् । अनंसिष्व । अनंसिष्म ॥ 10. लृङ् । अनंस्यत् ॥

[८४] क्रमु (क्रम्)=पादविक्षेपे । अक० । सेट् । पर० । to walk; to step; to go; to cross. 1. लट् । कामति ॥ 2. लोट् । क्रामतु ॥ 3. लङ् । अक्रामत् । 4. विधि० । क्रामेत् ॥ पक्षे–सार्वधातुके श्यन् । 1. लट् । क्राम्यति ॥ 2. लोट् । क्राम्यतु ॥ 3. लङ् । अक्राम्यत् ॥ 4. विधि० । क्राम्येत् ॥ 5. लिट् । प्र० चक्राम । चक्रमतुः । चक्रमुः ॥ म० चक्रमिथ । चक्रमथुः । चक्रम ॥ उ० चक्राम–चक्रम । चक्रमिव । चक्रमिम ॥ 6. लुट् । क्रमिता ॥ 7. लृट् । क्रमिष्यति । 8. आशी० । क्रम्यात् । क्रम्यास्ताम् । क्रम्यासुः ॥ 9. लुङ् । VII. प्र० अक्रमीत् । अक्रमिष्टाम् । अक्रमिषुः ॥ म० अक्रमीः । अक्रमिष्टम् । अक्रमिष्ट ॥ उ० अक्रमिषम् । अक्रमिष्व । अक्रमिष्म ॥ 10. लृङ् । अक्रमिष्यत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

अनुपसृष्टस्यास्य धातोः आत्मनेपदं वा भवति । तदाऽयमनिट् । क्रमते । क्रन्ता इत्यादि ॥

[८५] भ्रमु (भ्रम्)=चलने । अक० । सेट् । पर० । to roam about. 1. लट् । भ्रमति–भ्रम्यति ॥ 2. लोट् । भ्रमतु–तात् –भ्रम्यतु–तात् ॥ 3. लङ् । अभ्रमत्–अभ्रम्यत् ॥ 4. विधि० भ्रमेत्–भ्रम्येत् ॥ 5. लिट् । प्र० बभ्राम । बभ्रमतुः–भ्रेमतुः । बभ्रमुः–भ्रेमुः ॥ म० बभ्रमिथ–भ्रेमिथ । बभ्रमथुः–भ्रेमथुः । बभ्रम–भ्रेम ॥ उ० बभ्राम–बभ्रम । बभ्रमिव–भ्रेमिव । बभ्रमिम–भ्रेमिम ॥ 6. लुट् । प्र० भ्रमिता ॥ म० भ्रमितासि ॥ उ० भ्रमितास्मि ॥ 7. लृट्–भ्रमिष्यति ॥ 9. लुङ् । VII. अभ्रमीत् । अभ्रमिष्टाम् । अभ्रमिषुः ॥

[८६] क्षि = क्षये । अक० । अनि० । पर० । to decay; to waste. 1. लट् । क्षयति ॥ 2. लोट् । क्षयतु ॥ 3. लङ् । अक्षयत् ॥ 4. विधि० । क्षयेत् ॥ 5. लिट् । प्र० चिक्षाय । चिक्षियतुः । चिक्षियुः ॥ म० चिक्षयिथ–चिक्षेथ । चिक्षियथुः । चिक्षिय ॥ उ० चिक्षाय–चिक्षय । चिक्षियिव । चिक्षियिम ॥ 6. लुट् । क्षेता । क्षेतासि ॥ 7. लृट् । क्षेष्यति ॥ 8. आशी० । क्षीयात् । क्षीयास्ताम् ॥ 9. लुङ् । VI. प्र० अक्षैषीत् । अक्षैष्टाम् । अक्षैषुः ॥ म० अक्षैषीः । अक्षैष्टम् । अक्षैष्ट ॥ उ० अक्षैषम् । अक्षैष्व । अक्षैष्म ॥ 10. लृङ् । अक्षेष्यत् ॥

Public domain. Digitization Muthulakshmi Research Academy

[८७] जि = जये । अकर्मकः–सकर्मकश्च । अनि० । पर० । to conquer; to overcome. जयति इत्यादि ॥ 5. लिट् । प्र० जिगाय । जिग्यतुः । जिग्युः ॥ म० जिगयिथ–जिगेथ । जिग्यथुः । जिग्य ॥ उ० जिगाय–-जिगय । जिग्यिव । जिग्यिम ॥ 6. लुट् । जेता ॥ 7. लृट् । जेष्यति ॥ 8. आशी० । जीयात् । जीयास्ताम् ॥ 9. लुङ् । VI. प्र० अजैषीत् । अजैष्टाम् । अजैषुः ॥ म० अजैषीः । अजैष्टम् । अजैष्ट ॥ उ० अजैषम् । अजैष्व । अजैष्म ॥ 10. लृङ् अजेष्यत् ॥

[८८] षु (सु) = प्रसवैश्वर्ययोः । सकर्म०—अक० । अनि० । पर० । to bring forth; to possess power. 1. लट् । सवति ॥ 2. लोट् । सवतु ॥ 3. लङ् । असवत् ॥ 4. विधि० । सवेत् ॥ 5. लिट् । प्र० सुषाव । सुषुवतुः । सुषुवुः ॥ म० सुषविथ-सुषोथ । सुषुवथुः । सुषुव ॥ उ० सुषाव–सुषव । सुषुविव । सुषुविम ॥ 6. लुट् । सोता । 7. लृट् । सोष्यति ॥ 8. आशी० । सूयात् । सूयास्ताम् ॥ 9. लुङ् । VII. प्र० असावीत् । असाविष्टाम् । असाविषुः ॥ म० असावीः । असाविष्टम् । असाविष्ट ॥ उ० असाविषम् । असाविष्व । असाविष्म ॥ इडभावपक्षे–VI. प्र० असौषीत् । असौष्टाम् । असौषुः ॥ म० असौषीः । असौष्टम् । असौष्ट ॥ उ० असौषम् । असौष्व । असौष्म ॥ 10. लृङ् । असोष्यत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

[८९] द्रु = गतौ । अक० । अनि० । पर० । to go; to flow; to run; to melt. 1. लट् । द्रवति ॥ 2. लोट् । द्रवतु ॥ 3. लङ् । अद्रवत् ॥ 4. विधि० । द्रवेत् ॥ 5. लिट् । प्र० दुद्राव । दुद्रुवतुः । दुद्रुवुः ॥ म० दुद्रोथ । दुद्रुवथुः । दुद्रुव ॥ उ० दुद्राव–दुद्रव । दुद्रुव । दुद्रुम ॥ 6. लुट् । द्रोता । 7. लृट् । द्रोष्यति ॥ 8. आशी० । द्रूयात् । द्रूयास्ताम् ॥ 9. लुङ् । III. प्र० अदुद्रुवत् । अदुद्रुवताम् । अदुद्रुवन् ॥ म० अदुद्रुवः । अदुद्रुवतम् । अदुद्रुवत ॥ उ० अदुद्रुवम् । अदुद्रुवाव । अदुद्रुवाम ॥ 10. लृङ् । अद्रोष्यत् ॥

[९०] स्रु = गतौ । अक० । सेट् । पर० । to go; to flow. सर्वं द्रु (८९) धातुवत् ॥

(श्रृण्व)

[९१] श्रु = श्रवणे । सक० । अनि० । पर० । to hear. 1. लट् । प्र० शृणोति । शृणुतः । शृण्वन्ति ॥ म० शृणोषि । शृणुथः । शृणुथ ॥ उ० शृणोमि । शृणुवः–शृण्वः । शृणुमः–शृण्मः ॥ 2. लोट् । प्र० शृणोतु-शृणुतात् । शृणुताम् । शृण्वन्तु ॥ म० शृणु—शृणुतात् । शृणुतम् । शृणुत ॥ उ० शृणवानि । शृणवाव । शृणवाम ॥ 3. लङ् । प्र० अशृणोत । अशृणुताम् । अशृण्वन् ॥ म० अशृणोः । अशृणुतम् । अशृणुत ॥ उ० अशृणवम् । अशृणुव–अशृण्व ।

Public domain. Digitization Muthulakshmi Research Academy

अश्रृणुम--अश्रृण्म ॥ 4. विधि० । प्र० श्रृणुयात् । श्रृणुयाताम् । श्रृणुयुः ॥ म० श्रृणुयाः । श्रृणुयातम् । श्रृणुयात ॥ उ० श्रृणुयाम् । श्रृणुयाव । श्रृणुयाम ॥ 5. लिट् । प्र० शुश्राव । शुश्रुवतुः । शुश्रुवुः ॥ म० शुश्रोथ । शुश्रुवथुः । शुश्रुव ॥ उ० शुश्राव-शुश्रव । शुश्रुव । शुश्रुम ॥ 6. लुट् । श्रोता ॥ 7. लृट् । श्रोष्यति ॥ 8. आ.शी० । श्रूयात् । श्रूयास्ताम् । श्रूयासुः ॥ 9. लुङ् । VI. प्र० अश्रौषीत् । अश्रौष्टाम् । अश्रौषुः ॥ म० अश्रौषीः । अश्रौष्टम् । अश्रौष्ट ॥ उ० अश्रौषम् । अश्रौष्व । अश्रौष्म ॥ 10. लृङ् । अश्रोष्यत् ॥

[९२] स्मृ=चिन्तायाम् । सक० । अनि० । पर० । to remember; to recollect; to think upon. स्मरति इत्यादि । 5. लिट् । प्र० सस्मार । सस्मरतुः । सस्मरुः ॥ म० सस्मर्थ । सस्मरथुः । सस्मर ॥ उ० सस्मार–सस्मर । सस्मरिव । सस्मरिम ॥ 9. लुङ् । VI. अस्मार्षीत् । अस्मार्ष्टाम् । अस्मार्षुः ॥ इत्यादि सृ (७४) धातुवत् ॥

[९३] तॄ=प्लवनतरणयोः । सक० । सेट् । पर० । to swim; to cross over; to float; to escape from. 1. लट् । तरति ॥ 2. लोट् । तरतु । 3. लङ् । अतरत् ॥ 4. विधि० । तरेत् ॥ 5. लिट् । प्र० ततार । तेरतुः । तेरुः ॥ म० तेरिथ । तेरथुः । तेर । उ० ततार–

In Public domain. Digitization Muthulakshmi Research Academy

ततर । तेरिव । तेरिम ॥ 6. लुट् । तरिता–तरीता ॥ 7. लृट् । तरिष्यति–तरीष्यति ॥ 8. आशी० । तीर्यात् । तीर्यास्ताम् । तीर्यासुः ॥ 9. लुङ् । VII. प्र० अतारीत् । अतारिष्टाम् । अतारिषुः ॥ म० अतारीः । अतारिष्टम् । अतारिष्ट ॥ उ० अतारिषम् । अतारिष्व । अतारिष्म ॥ 10. लृङ् । अतरिष्यत्-अतरीष्यत् ॥

[९४] तप = संतापे । सक० - अक० । अनि० । पर० । to shine; to be hot; to make hot. तपति इत्यादि । 5. लिट् । प्र० तताप । तेपतुः । तेपुः ॥ म० तेपिथ–ततप्थ । तेपथुः । तेप ॥ उ० तताप–ततप । तेपिव । तेपिम ॥ 6. लुट् । तप्ता ॥ 7. लृट् । तप्स्यति ॥ 8. आशी० । तप्यात् । तप्यास्ताम् ॥ 9. लुङ् । VI. प्र० अताप्सीत् । अताप्ताम् । अताप्सुः ॥ म० अताप्सीः । अताप्तम् । अताप्त ॥ उ० अताप्सम् । अताप्स्व । अताप्स्म ॥ 10. लृङ् । अतप्स्यत् ॥

[९५] त्यज = हानौ । सक० । अनि० । पर० । to abandon; to leave; to let go. त्यजति इत्यादि । 5. लिट् । प्र० तत्याज । तत्यजतुः । तत्यजुः ॥ म० तत्यजिथ–तत्यक्थ । तत्यजथुः । तत्यज ॥ उ० तत्याज–तत्यज । तत्यजिव । तत्यजिम ॥ 6. लुट् । त्यक्ता ॥

n Public domain. Digitization Muthulakshmi Research Academ

7. लृट् । त्यक्ष्यति ॥ 8. आशी० । त्यज्यात् । त्यज्यास्ताम् ॥ 9. लुङ् । VI. प्र० अत्याक्षीत् । अत्याक्ताम् । अत्याक्षुः ॥ म० अत्याक्षीः । अत्याक्तम् । अत्याक्त ॥ उ० अत्याक्षम् । अत्याक्ष्व । अत्याक्ष्म ॥ 10. लृङ् । अत्यक्ष्यत् ॥

[९६] षञ्ज (सञ्ज्) = सङ्गे । अक० । अनि० । पर० । to cling to ; to fasten ; to embrace. 1. लट् । सजति ॥ 2. लोट् । सजतु ॥ 3. लङ् । असजत् ॥ 4. विधि० । सजेत् ॥ 5. लिट् । प्र० ससञ्ज । ससञ्जतुः । ससञ्जुः ॥ म० ससञ्जिथ-ससङ्क्थ । ससञ्जथुः । ससञ्ज ॥ उ० ससञ्ज । ससञ्जिव । ससञ्जिम ॥ 6. लुट् । सङ्क्ता । 7. लृट् । सङ्क्ष्यति ॥ 8. आशी० । सज्यात् । सज्यास्ताम् ॥ 9. लुङ् । VI. प्र० असाङ्क्षीत् असाङ्क्ताम् । असाङ्क्षुः ॥ म० असाङ्क्षीः । असाङ्क्तम् । असाङ्क्त ॥ उ० आसाङ्क्षम् । असाङ्क्ष्व । असाङ्क्ष्म ॥ 10. लृङ् । असङ्क्ष्यत् । असङ्क्ष्यताम् ॥

[९७] दह = भस्मीकरणे । सक० । अनि० । पर० । to burn. 1. लट् । दहति । 2. लोट् । दहतु ॥ 3. लङ् । अदहत् ॥ 4. विधि० । दहेत् ॥ 5. लिट् । प्र० ददाह । देहतुः । देहुः ॥ म० देहिथ-ददग्ध । देहथुः । देह ॥ उ०

In Public domain. Digitization Muthulakshmi Research Academy

दहाह-ददह । देहिव । देहिम ॥ 6. लुट् । दग्धा ॥ 7. लृट् । धक्ष्यति ॥ 8. आशी० । दह्यात् । दह्यास्ताम् ॥ 9. लुङ् । VI. प्र० अधाक्षीत् । अदाग्धाम् । अधाक्षुः ॥ म० अधाक्षीः । अदाग्धम् । अदाग्ध ॥ उ० अधाक्षम् । अधाक्ष्व । अधाक्ष्म ॥ 10. लृङ् । अधक्ष्यत् ॥

[९८] मिह = सेचने । सक० । अनि० । पर० । to sprinkle; to wet. 1. लट् । मेहति ॥ 2. लोट् । मेहतु ॥ 3. लङ् । अमेहत् ॥ 4. विधि० । मेहेत् ॥ 5. लिट् । प्र० मिमेह । मिमिहतुः । मिमिहुः ॥ म० मिमेहिथ । मिमिहथुः । मिमिह ॥ उ० मिमेह । मिमिहिव । मिमिहिम ॥ 6. लुट् । प्र० मेढा । मेढारौ ॥ म० मेढासि ॥ उ० मेढास्मि ॥ 7. लृट् । मेक्ष्यति ॥ 8. आशी० । मिह्यात् । मिह्यास्ताम् ॥ 9. लुङ् । V. प्र० अमिक्षत् । अमिक्षताम् । अमिक्षन् ॥ म० अमिक्षः । अमिक्षतम् । अमिक्षत ॥ उ० अमिक्षम् । अमिक्षाव । अमिक्षाम ॥ 10. लृङ् । अमेक्ष्यत् ॥

[९९] रुह = बीजजन्मनि प्रादुर्भावे च । अक० । अनि० । पर० । to grow from seed; to become manifest; to rise. रोहति इत्यादि । 5. लिट् । प्र० रुरोह । रुरुहतुः । रुरुहुः ॥ म० रुरोहिथ । रुरुहथुः । रुरुह ॥ उ० रुरोह । रुरुहिव । रुरुहिम ॥ 6. लुट् । रोढा । रोढारौ ॥

n Public domain. Digitization Muthulakshmi Research Academ

KSm

7. लृट्। रोक्ष्यति ॥ 8. आशी० । रुह्यात्। रुह्यास्ताम् ॥ 9. लुङ्। V. प्र० अरुक्षत्। अरुक्षताम्। अरुक्षन्॥ म० अरुक्षः। अरुक्षतम्। अरुक्षत ॥ उ० अरुक्षम्। अरुक्षाव। अरुक्षाम ॥ 10. लृङ्। अरोक्ष्यत्॥

[१००] स्कन्दिर् (स्कन्द्) = गतिशोषणयोः। सक०। अनि०। पर०। to go; to be dry. 1. लट्। स्कन्दति ॥ 2. लोट्। स्कन्दतु ॥ 3. लङ्। अस्कन्दत्॥ 4. विधि०। स्कन्देत्। 5. लिट्। प्र० चस्कन्द। चस्कन्दतुः। चस्कन्दुः ॥ म० चस्कन्दिथ-चस्कन्थ। चस्कन्दथुः। चस्कन्द ॥ उ० चस्कन्द। चस्कन्दिव। चस्कन्दिम ॥ 6. लुट्। स्कन्ता ॥ 7. लृट्। स्कन्त्स्यति ॥ 8. आशी०। स्कद्यात्। स्कद्यास्ताम् ॥ 9. लुङ्। II. प्र० अस्कदत्। अस्कदताम्। अस्कदन्॥ म० अस्कदः। अस्कदतम्। अस्कदत ॥ उ० अस्कदम्। अस्कदाव। अस्कदाम ॥ पक्षे-VI. प्र० अस्कान्त्सीत्। अस्कान्ताम्। अस्कान्त्सुः ॥ म० अस्कान्त्सीः। अस्कान्तम्। अस्कान्त ॥ उ० अस्कान्त्सम्। अस्कान्त्स्व। अस्कान्त्स्म ॥ 10. लृङ्। अस्कन्त्स्यत्॥

[१०१] टु ओ श्वि (श्वि) = गतिवृद्ध्योः। अक०। सेट्। पर०। to move; to increase; to grow; to swell. 1. लट्। श्वयति ॥ 2. लोट्। श्वयतु ॥ 3. लङ्। अश्वयत्॥ 4. विधि०। श्वयेत्॥ 5. लिट्। प्र० शुशाव।

In Public domain. Digitization Muthulakshmi Research Academy

शुशुवतुः । शुशुवुः । म० शुशविथ–शुशोथ । शुशुवथुः । शुशुव ॥ उ० शुशाव--शुशव । शुशुविव । शुशुविम ॥ पक्षे–प्र० शिश्वाय । शिश्वियतुः । शिश्वियुः ॥ म० शिश्वयिथ । शिश्वियथुः । शिश्विय ॥ उ० शिश्वाय–शिश्वय । शिश्वियिव । शिश्वियिम ॥ 6. लुट् । श्वयिता ॥ 7. लृट् । श्वयिष्यति ॥ 8. आशी० । शूयात् । शूयास्ताम् ॥ 9. लुङ् । II. प्र० अश्वत् । अश्वताम् । अश्वन् ॥ म० अश्वः । अश्वतम् । अश्वत ॥ उ० अश्वम् । अश्वाव । अश्वाम ॥ चङ् पक्षे—III. प्र० अशिश्वियत् । अशिश्वियताम् । अशिश्वियन् ॥ म० अशिश्वियः । अशिश्वियतम् । अशिश्वियत ॥ उ० अशिश्वियम् । अशिश्वियाव । अशिश्वियाम ॥ अथवा—VII. प्र० अश्वयीत् । अश्वयिष्टाम् । अश्वयिषुः ॥ म० अश्वयीः । अश्वयिष्टम् । अश्वयिष्ट ॥ उ० अश्वयिषम् । अश्वयिष्व । अश्वयिष्म ॥ 10. लृङ् । अश्वयिष्यत् ॥

[१०२] स्वृ = शब्दोपतापयोः । अक० । वेट् । पर० । to sound; to pain. 1. लट् । स्वरति । 2. लोट् । स्वरतु ॥ 3. लङ् । अस्वरत् ॥ 4. विधि० । स्वरेत् ॥ 5 लिट् । प्र० सस्वार । सस्वरतुः । सस्वरुः ॥ म० सस्वरिथ–सस्वर्थ । सस्वरथुः । सस्वर ॥ उ० सस्वार–सस्वर । सस्वरिव । सस्वरिम ॥ 6. लुट् । स्वर्ता–स्वरिता ॥

n Public domain. Digitization Muthulakshmi Research Academ

7. लुट् । स्वरिष्यति ॥ 8. आशी० । स्वर्यात् । स्वर्यास्ताम् ॥ 9. लुङ् । VII. प्र० अस्वारीत् । अस्वारिष्टाम् । अस्वारिषुः ॥ म० अस्वारीः । अस्वारिष्टम् । अस्वारिष्ट ॥ उ० अस्वारिषम् । अस्वारिष्व । अस्वारिष्म ॥ पक्षे—VI. प्र० अस्वार्षीत् । अस्वार्ष्टाम् । अस्वार्षुः ॥ म० अस्वार्षीः । अस्वार्ष्टम् । अस्वार्ष्ट ॥ उ० अस्वार्षम् । अस्वार्ष्व । अस्वार्ष्म ॥ 10. लृङ् । अस्वरिष्यत् ॥

[१०३] ह्वृ = कौटिल्ये । अक० । अनि० । पर० । to be crooked ; to deceive. स्मृ (९२) धातुवत् ॥

इति भ्वादौ परस्मैपदिनः ।

In Public domain. Digitization Muthulakshmi Research Academy

अथ भ्वादावात्मनेपदिनः ।

दशानां लकाराणां परिनिष्ठिताः प्रत्ययाः प्रदर्श्यन्ते ॥ 1. लट्- प्र० ते । इते । अन्ते ॥ म० से । इथे । ध्वे ॥ उ० इ । वहे । महे ॥ 2. लोट्-प्र० ताम् । इताम् । अन्ताम् ॥ म० स्व । इथाम् । ध्वम् ॥ उ० ऐ । आवहै । आमहै ॥ 3. लङ् । प्र० त । इताम् । अन्त ॥ म० थास् । इथाम् । ध्वम् ॥ उ० इ । वहि । महि ॥ 4. विधि० । प्र० ईत । ईयाताम् । ईरन् । म० ईथाः । ईयाथाम् । ईध्वम् ॥ उ० ईय । ईवहि । ईमहि ॥ 5. लिट् । प्र० ए । आते । इरे ॥ म० से । आथे । ध्वे ॥ उ० ए । वहे । महे ॥ 6. लुट् । प्र० ता । तारौ । तारः । म० तासे । तासाथे । ताध्वे ॥ उ० ताहे । तास्वहे । तास्महे ॥ 7. लृट् । प्र० स्यते । स्येते । स्यन्ते ॥ म० स्यसे । स्येथे । स्यध्वे ॥ उ० स्ये । स्यावहे । स्यामहे ॥ 8. आशी० । प्र० सीष्ट । सीयास्ताम् । सीरन् ॥ म० सीष्ठाः । सीयास्थाम् । सीध्वम् ॥ उ० सीय । सीवहि । सीमहि ॥ 9. लुङ् । प्रत्ययाः पञ्चविधाः—

n Public domain. Digitization Muthulakshmi Research Academ

VIII. परस्मैपदमारभ्य अष्टमी विधा च्लेरङादेशेन । प्र० त । इताम् । अन्त ॥ म० थास् । इथाम् । ध्वम् ॥ उ० इ । वहि । महि ॥

उदाहरणम्—प्र० अवोचत । अवोचेताम् । अवोचन्त ॥ म० अवोचथाः । अवोचेथाम् । अवोचध्वम् ॥ उ० अवोचे । अवोचावहि । अवोचामहि ॥

IX. नवमी विधा च्लेश्चङादेशेन । प्रत्ययाः पूर्ववत् । विशेषस्तु धातोरत्र द्वित्वम् ।

उदाहरणम्—गदव्यक्तायां वाचि इत्यस्मात् णिचि । प्र० अजीगदत । अजीगदेताम् । अजीगदन्त ॥ म० अजीगदथाः । अजीगदेथाम् । अजीगदध्वम् ॥ उ० अजीगदे । अजीगदावहि । अजीगदामहि ॥

X. दशमी विधा । अनिड्भ्यो धातुभ्यः च्लेः सिजादेशेन । प्र० स्त । साताम् । सत ॥ म० स्थाः । साथाम् । ध्वम् ॥ उ० । सि । स्वहि । स्महि ॥

उदाहरणम्—डु पचष् = पाके । प्र० अपक्त । अपक्षाताम् । अपक्षत ॥ म० अपक्थाः । अपक्षाथाम् । अपग्ध्वम् ॥ उ० अपक्षि । अपक्ष्वहि । अपक्ष्महि ॥

XI. एकादशी विधा । सेड्भ्यो धातुभ्यः च्लेः सिजादेशेन । प्र० इष्ट । इषाताम् । इषत ॥ म० इष्ठाः । इषाथाम् ।

In Public domain. Digitization Muthulakshmi Research Academy

इध्वम् ॥ उ० इषि । इष्वहि । इष्महि ॥

उदाहरणम् — प्र० अगाधिष्ट । अगाधिषाताम् । अगाधिषत ॥ म० अगाधिष्ठाः । अगाधिषाथाम् । अगाधिध्वम्–ढ्वम् ॥ उ० अगाधिषि । अगाधिष्वहि । अगाधिष्महि ॥

XII. द्वादशी विधा । अनिड्भ्यो धातुभ्यः च्लेः क्स।देशेन । प्र० सत । साताम् । सन्त ॥ म० सथाः । साथाम् । सध्वम् ॥ उ० सि । सावहि । सामहि ॥

उदाहरणम्—प्र० दिश = अतिसर्जने । अदिक्षत । अदिक्षाताम् । अदिक्षन्त ॥ म० अदिक्षथाः । अदिक्षाथाम् । अदिक्षध्वम् ॥ उ० अदिक्षि । अदिक्षावहि । अदिक्षामहि ॥

10. लृङ् । प्र० स्यत । स्येताम् । स्यन्त ॥ म० स्यथाः । स्येथाम् । स्यध्वम् ॥ उ० स्ये । स्यावहि । स्यामहि ॥

n Public domain. Digitization Muthulakshmi Research Academ

अथ भ्वादौ आत्मनेपदिनः ।

[१०४] एध = वृद्धौ । अक० । सेट् । आत्मनेपदी । to grow; to increase; to prosper; to rise. 1. लट् । प्र० एधते । एधेते । एधन्ते ॥ म० एधसे । एधेथे । एधध्वे ॥ उ० एधे । एधावहे । एधामहे ॥ 2. लोट् । प्र० एधताम् । एधेताम् । एधन्ताम् ॥ म० एधस्व । एधेथाम् । एधध्वम् ॥ उ० एधै । एधावहै । एधामहै ॥ 3. लङ् । प्र० ऐधत । ऐधेताम् । ऐधन्त ॥ म० ऐधथाः । ऐधेथाम् । ऐधध्वम् ॥ उ० ऐधे । ऐधावहि । ऐधामहि ॥ 4. विधि० । प्र० एधेत । एधेयाताम् । एधेरन् ॥ म० एधेथाः । एधेयाथाम् । एधेध्वम् ॥ उ० एधेय । एधेवहि । एधेमहि ॥ 5. लिटि कृञ्धातोरनुप्रयोगे—प्र० एधाञ्चक्रे । एधाञ्चक्राते । एधाञ्चक्रिरे ॥ म० एधाञ्चकृषे । एधाञ्चक्राथे । एधाञ्चकृढ्वे ॥ उ० एधाञ्चक्रे । एधाञ्चकृवहे । एधाञ्चकृमहे ॥ भूधातोरनुप्रयोगे—प्र० एधांबभूव । एधांबभूवतुः । एधांबभूवुः ॥ म० एधांबभूविथ । एधांबभूवथुः । एधांबभूव ॥ उ० एधांबभूव । एधांबभूविव । एधांबभूविम ॥ असधातोरनुप्रयोगे—प्र०

In Public domain. Digitization Muthulakshmi Research Academy

एधामास । एधामासतुः एधामासुः ॥ म० एधामासिथ । एधामासथुः । एधामास ॥ उ० एधामास । एधामासिव । एधामासिम ॥ 6. लुट् । प्र० एधिता । एधितारौ । एधितारः ॥ म० एधितासे । एधितासाथे । एधिताध्वे ॥ उ० एधिताहे । एधितास्वहे । एधितास्महे ॥ 7. लृट् । प्र० एधिष्यते । एधिष्येते । एधिष्यन्ते ॥ म० एधिष्यसे । एधिष्येथे । एधिष्यध्वे ॥ उ० एधिष्ये । एधिष्यावहे । एधिष्यामहे ॥ 8. आशी० । प्र० एधिषीष्ट । एधिषीयास्ताम् । एधिषीरन् ॥ म० एधिषीष्ठाः । एधिषीयास्थाम् । एधिषीध्वम् ॥ उ० एधिषीय । एधिषीवहि । एधिषीमहि ॥ 9. लुङ् । XI. प्र० ऐधिष्ट । ऐधिषाताम् । ऐधिषत ॥ म० ऐधिष्ठाः । ऐधिषाथाम् । ऐधिढ्वम्—ध्वम् ॥ उ० ऐधिषि । ऐधिष्वहि । ऐधिष्महि ॥ 10. लृङ् । प्र० ऐधिष्यत । ऐधिष्येताम् । ऐधिष्यन्त ॥ म० ऐधिष्यथाः । ऐधिष्येथाम् । ऐधिष्यध्वम् ॥ उ० ऐधिष्ये । ऐधिष्यावहि । ऐधिष्यामहि ॥

[१०५] एजृ (एज्) = दीप्तौ । अक० । सेट् । आत्म० । to shine एध (१०४) धातुवत् ॥ 1. लट् । एजते ॥ 3. लङ् । ऐजत ॥ 5. लिट् । एजांचक्रे ॥

[१०६] ईज = गतिकुत्सनयोः । सक० । सेट् । आ० । to go;

n Public domain. Digitization Muthulakshmi Research Academ

to censure. एध (१०४) धातुवत्। 1. लट्। ईजते 3. लङ्। ऐजत॥ 5. लिट्। ईजांचक्रे॥ 9. लुङ्। ऐजिष्ट॥ 10. लृङ्। ऐजिष्यत॥

[१०७] ईह = चेष्टायाम्। अक०। सेट्। आत्म०। to endeavour; to wish; to aim at. एध (१०४) धातुवत्। 3. लङ्। ऐहत॥ 5. लिट्। ईहांचक्रे॥ 9. लुङ्। XI. ऐहिष्ट॥ 10. लृङ्। ऐहिष्यत॥

[१०८] ऊह = वितर्के। सक०। सेट्। आ०। to guess; to reason. एध (१०४) धातुवत्। 3. लङ्। औहत॥ 5. लिट्। ऊहांचक्रे॥ 9. लुङ्। XI. औहिष्ट॥ 10. लृङ्। औहिष्यत॥

[१०९] मुद = हर्षे। अक०। सेट्। आत्म०। to rejoice; to be glad. 1. लट्। मोदते॥ 3 लोट्। मोदताम्॥ 2. लङ्। अमोदत॥ 4. विधि०। मोदेत॥ 5. लिट्। प्र० मुमुदे। मुमुदाते। मुमुदिरे॥ म० मुमुदिषे। मुमुदाथे। मुमुदिध्वे॥ उ० मुमुदे। मुमुदिवहे। मुमुदिमहे॥ 6. लुट्। प्र० मोदिता॥ 7. लृट्। मोदिष्यते॥ 8. आशी०। प्र० मोदिषीष्ट। मोदिषीयास्ताम्। मोदिषीरन्॥ म० मोदिषीष्ठाः। मोदिषीयास्थाम्। मोदिषीध्वम्॥ उ० मोदिषीय। मोदिषीवहि। मोदिषीमहि॥ 9. लुङ्। XI.

In Public domain. Digitization Muthulakshmi Research Academy

प्र० अमोदिष्ट । अमोदिषाताम् । अमोदिषत ॥ म० अमोदिष्ठाः । अमोदिषाथाम् । अमोदिध्वम्--ढ्वम् ॥ उ० अमोदिषि । अमोदिष्वहि । अमोदिष्महि ॥ 10. लृङ् । प्र० अमोदिष्यत । अमोदिष्येताम् । अमोदिष्यन्त ॥ इत्यादि ॥

[११०] रुच = दीप्तौ । अक० । सेट् । आत्म० । to shine; to be pleased. मुद (१०९) धातुवत् ॥ रोचते ॥ रुरुचे ॥

[१११] शुभ = दीप्तौ । अक० । सेट् । आत्म० । to shine. मुद (१०९) धातुवत् । शोभते ॥ शुशुभे ॥

[११२] कुक = आदाने । सक० । सेट् । आत्म० । to take. लट् । कोकते । मुद (१०९) धातुवत् 5. लिट् । चुकुके ॥ 9. लुङ् । XI. अकोकिष्ट ॥

[११३] ष्टुभु (स्तुभ्) = स्तंभे । अक० । सेट् । आत्म० । to stop मुद (१०९) धातुवत् ॥ 1. लट् । स्तोभते ॥ 5. लिट् । तुष्टुभे ॥ 9. लुङ् । अस्तोभिष्ट ॥

[११४] द्युत = दीप्तौ । अक० । सेट् । आत्म० । to shine; to be bright. 1. लट् । द्योतते ॥ 2. लोट् । द्योतताम् ॥ 3. लङ् । अद्योतत ॥ 4. विधि० । द्योतेत ॥ 5. लिट् । प्र० दिद्युते । दिद्युताते । दिद्युतिरे ॥ म० दिद्युतिषे । दिद्युताथे । दिद्युतिध्वे ॥ उ० दिद्युते । दिद्युतिवहे । दिद्युतिमहे ॥ 6. लुट् । द्योतिता ॥ 7. लृट् । द्योतिष्यते ॥

n Public domain. Digitization Muthulakshmi Research Academ

8. आशी० । द्योतिषीष्ट ॥ 9. लुङ् । XI. अद्योतिष्ट । अद्योतिषाताम् । अद्योतिषत ॥ पक्षे—II. अद्युतत् । अद्युतताम् । अद्युतन् ॥ 10. लृङ् । अद्योतिष्यत ॥

[११५] वदि (वन्द्) = अभिवादनस्तुत्योः । सक० । सेट् । आत्म० । to salute ; to praise. 1. लट् । वन्दते । वन्देते । वन्दन्ते ॥ 2. लोट् । वन्दताम् ॥ 3. लङ् । अवन्दत ॥ 4. विधि० । वन्देत ॥ 5. लिट् । प्र० ववन्दे । ववन्दाते । ववन्दिरे ॥ म० । ववन्दिषे । ववन्दाथे । ववन्दिध्वे ॥ उ० । ववन्दे । ववन्दिवहे । ववन्दिमहे ॥ 6. लुट् । प्र० वन्दिता ॥ म० वन्दितासे ॥ उ० वन्दिताहे ॥ 7. लृट् । वन्दिष्यते ॥ 8. आशी० । वन्दिषीष्ट । वन्दिषीयास्ताम् । वन्दिषीरन् ॥ 9. लुङ् । XI. प्र० अवन्दिष्ट । अवन्दिषाताम् । अवन्दिषत ॥ म० अवन्दिष्ठाः । अवन्दिषाथाम् । अवन्दिध्वम्—ढ्वम् ॥ उ० अवन्दिषि । अवन्दिष्वहि । अवन्दिष्महि ॥ 10. लृङ् । अवन्दिष्यत ॥

[११६] भदि (भन्द्) = कल्याणे सुखे च । अक० । सेट् । आत्म० । to be prosperous ; to be glad. वदि (११५) धातुवत् ॥ भन्दते ॥ बभन्दे ॥

[११७] मदि (मन्द्) = स्तुतिमोदमदस्वप्नकान्तिगतिषु । सक० । अक० । सेट् । आत्म० । to praise ; to be glad ; to

In Public domain. Digitization Muthulakshmi Research Academy

sleep ; to shine ; to move slowly. वदि (११५) धातुवत् ॥ मन्दते ॥ ममन्दे ॥

[११८] स्पदि = (स्पन्द्) – किंचिच्चलने । अक० । सेट् । आत्म० । to throb वदि (११५) धातुवत् ॥ स्पन्दते ॥ पस्पन्दे ॥

[११९] स्पर्ध = संघर्षे । अक० । सेट् । आत्म० । to contend with ; to challenge. वदि (११५) धातुवत् । स्पर्धते ॥ 5. लिट् । पस्पर्धे ॥ 9. लुङ् । XI.अस्पर्धिष्ट ॥

[१२०] दद=दाने । सक० । सेट् । आत्म० । to give ; to offer. वदि (११५) धातुवत् । ददते ॥ ददेते । ददन्ते ॥ 5. लिट् । प्र० ददде । दददाते । दददिरे ॥ म० दददिषे । दददाथे । दददिध्वे ॥ उ० ददде । दददिवहे । दददिमहे ॥ 9. लुङ् । XI. अददिष्ट ॥ म० अददिध्वम्–ढ्वम् ॥

[१२१] दध = धारणे । सक० । सेट् । आत्म० । to hold ; to possess. लट् । दधते । 5. लिट् । प्र० देधे । देधाते । देधिरे ॥ म० देधिषे । देधाथे । देधिध्वे ॥ उ० देधे । देधिवहे । देधिमहे ॥ 9. लुङ् । XI. प्र० अदधिष्ट ॥ म० अदधिढ्वम्–ध्वम् ॥

[१२२] दय = दान-गति-रक्षण-हिंसाऽऽदानेषु । सक० । सेट् । आत्म० । to pity : to give ; to go ; to protect ;

Public domain. Digitization Muthulakshmi Research Academy

to kill; to take. दध (१२१) धातुवत्। 5. लिट्।
दयांचक्रे। दयामास। दयांबभूव॥ इति विशेषः।

[१२३] अय=गतौ। सक०। सेट्। आत्म०। to go. दध (१२१) धातुवत्। 1. लट्। अयते॥ 2. लोट्। अयताम्॥ 3. लङ्। आयत॥ 4. विधि०। अयेत॥ 5. लिट्। अयांचक्रे॥ 8. आशी०। अयिषीष्ट॥ 9. लुङ्। XI. आयिष्ट॥ म० आयिषीध्वम्--ढ्वम्॥

[१२४] चक्क=तृप्तौ प्रतिघाते च। सक०। सेट्। आत्म०। to be satisfied; to repel; to resist; to shine दध (१२१) धातुवत्॥ लट्। चकते॥ 5. लिट्। चेके॥

[१२५] वल=संवरणे संचरणे च। सक०। सेट्। आत्म०। to cover; to move. दध (१२१) धातुवत्। विशेषस्तु॥ 5. लिट्। ववले। ववलाते। ववलिरे। इत्यादि दद (१२०) धातुवत्॥

[१२६] कत्थ=श्लाघायाम्। सक०। सेट्। आत्म०। to praise; to boast; to flatter. 1. लट्। कत्थते॥ 2. लोट्। कत्थताम्॥ 3. लङ्। अकत्थत॥ 4. विधि०। कत्थेत॥ 5. लिट्। चकत्थे। चकत्थाते। चकत्थिरे॥ 9. लुङ्। XI. अकत्थिष्ट॥ म० अकत्थिध्वम्—ढ्वम्॥

[१२७] वर्च=दीप्तौ। अक०। सेट्। आत्म०। to shine.

In Public domain. Digitization Muthulakshmi Research Academy

1. लट् । वर्चते ॥ 2. लोट् । वर्चताम् ॥ 3. लङ् अवर्चत ॥ 4. विधि० । वर्चेत ॥ 5. लिट् । ववर्चे । ववर्चाते । ववर्चिरे ॥ 9. लुङ् । XI. अवर्चिष्ट ॥

[१२८] गाधृ (गाध्) = प्रतिष्ठालिप्सयोर्ग्रन्थे च । सक० । सेट् । आत्म० । to set out for; to dine; to seek; to compile; to string together. 1. लट् । गाधते ॥ 2. लोट् । गाधताम् ॥ 3. लङ् । अगाधत ॥ 4. विधि० । गाधेत ॥ 5. लिट् । प्र० जगाधे । जगाधाते । जगाधिरे ॥ म० जगाधिषे । जगाधाथे । जगाधिध्वे ॥ उ० जगाधे । जगाधिवहे । जगाधिमहे ॥ 6. लुट् । गाधिता ॥ 7. लृट् । गाधिष्यते ॥ 8. आशी० । गाधिषीष्ट ॥ 9. लुङ् । XI. प्र० अगाधिष्ट ॥ म० अगाधिष्ठाः । अगाधिध्वम् – ढ्वम् ॥ 10. लृट् । अगाधिष्यत ॥

[१२९] बाधृ (बाध्) = लोडने । सक० । सेट् । आत्म० । to oppress; to torment. बाधते ॥ बबाधे ॥ गाधृ (१२८) धातुवत् ॥

[१३०] भ्राजृ (भ्राज्) = दीप्तौ । अक० । सेट् । आत्म० । to shine. लट् । भ्राजते । 5. लिट् । बभ्राजे । इत्यादि गाधृ (१२८) धातुवत् ॥

[१३१] काशृ(काश्) = दीप्तौ । अक० । सेट् । आत्म० । to

n Public domain. Digitization Muthulakshmi Research Academ

shine. गाधृ (१२८) धातुवत् ॥ काशते ॥ चकाशे ॥

[१३२] भाष = व्यक्तायां वाचि । सक० । सेट् । आत्म० । to speak; to say; to describe. गाधृ (१२८) धातुवत् ॥ भाषते ॥ बभाषे ॥

[१३३] श्लाघृ (श्लाघ्) = सामर्थ्ये । सक० । सेट् । आत्म० । to praise; to flatter; to boast. गाधृ (१२८) धातुवत् । लट् । श्लाघते ॥ 5. लिट् । शश्लाघे ॥

[१३४] तिपृ (तिप्) = क्षरणे । सक० । अनि० । आत्म० । to drop; to ooze. लट् । तेपते ॥ 5. लिट् । प्र० तितिपे । तितिपाते । तितिपिरे ॥ म० तितिपिषे । तितिपाथे । तितिपिध्वे ॥ उ० तितिपे । तितिपिवहे । तितिपिमहे ॥ 6. लुट् । तेप्ता ॥ 7. लृट् । तेप्स्यते ॥ 8. आशी० । प्र० तिप्सीष्ट । तिप्सीयास्ताम् । तिप्सीरन् ॥ म० । तिप्सीष्ठाः ॥ उ० तिप्सीय ॥ 9. लुङ् । X. प्र० अतिप्त । अतिप्साताम् । अतिप्सत ॥ म० अतिप्थाः । अतिप्साथाम् । अतिब्ध्वम् ॥ उ० अतिप्सि । अतिप्स्वहि । अतिप्स्महि ॥ 10. लृङ् । अतेप्स्यत ॥

[१३५] त्रपूष् (त्रप्) = लज्जायाम् । अक० । वेट् । आत्म० । to be ashamed. 1. लट् । त्रपते ॥ 2. लोट् । त्रपताम् ॥ 3. लङ् । अत्रपत ॥ 4. विधि० । त्रपेत ॥

In Public domain. Digitization Muthulakshmi Research Academy

5. लिट् । प्र० त्रेपे । त्रेपाते । त्रेपिरे ॥ म० त्रेपिषे— त्रेप्से । त्रेपाथे । त्रेपिध्वे -- त्रेब्ध्वे ॥ उ० त्रेपे । त्रेपिवहे – त्रेप्वहे । त्रेपिमहे -- त्रेप्महे ॥ 6. लुट् । त्रपिता- त्रप्ता ॥ 7. लृट् । त्रपिष्यते -- त्रप्स्यते ॥ 8. आशी० -- त्रपिषीष्ट -- त्रप्सीष्ट । त्रपिषीयास्ताम् -- त्रप्सीयास्ताम् । त्रपिषीरन् -- त्रप्सीरन् ॥ 9. लुङ् । XI. प्र० अत्रपिष्ट । अत्रपिषाताम् । अत्रपिषत ॥ म० अत्रपिष्ठाः । अत्रपिषाथाम् । अत्रपिध्वम्--ढ्वम् ॥ उ० अत्रपिषि । अत्रपिष्वहि । अत्रपिष्महि ॥ इडभावपक्षे । X. प्र० अत्रप्त । अत्रप्साताम् । अत्रप्सत ॥ म० अत्रब्धाः । अत्रप्साथाम् । अत्रब्ध्वम् ॥ उ० अत्रप्सि । अत्रप्स्वहि । अत्रप्स्महि ॥ 10. लृङ् । अत्रपिष्यत -- अत्रप्स्यत ॥

[१३६] कृपू (कल्प्)= सामर्थ्ये । अक० । वेट् । आत्म० । to be fit for; to be able. 1. लट् । कल्पते ॥ 2. लोट् । कल्पताम् ॥ 3. लङ् । अकल्पत ॥ 4. विधि० । कल्पेत ॥ 5. लिट् । प्र० चक्लृपे । चक्लृपाते । चक्लृपिरे ॥ म० चक्लृपिषे – चक्लृप्से । चक्लृपाथे । चक्लृपिध्वे ॥ उ० चक्लृपे । चक्लृपिवहे -- चक्लृप्वहे । चक्लृपिमहे – चक्लृप्महे ॥ 6. लुट् । प्र० कल्पिता -- कल्प्ता ॥ म० कल्पितासे -- कल्प्तासे । उ० कल्पिताहे -- कल्प्ताहे ॥ परस्मैपदपक्षे -- प्र० कल्प्ता ॥ म० कल्प्तासि ॥ उ० कल्प्तास्मि ॥ 7. लृट् । कल्पिष्यते -- कल्प्स्यते-- कल्प्स्यति ।

n Public domain. Digitization Muthulakshmi Research Academ

इत्यादि परस्मैपदरूपाणि च ॥ 8. आशी० । कल्पिषीष्ट -- क्लृप्सीष्ट ॥ 9. लुङ् । XI. अकल्पिष्ट । अकल्पिषाताम् । अकल्पिषत । अनिट्पक्षे -- X. -- अक्लृप्त । अक्लृप्साताम् । अक्लृप्सत ॥ परस्मैपदपक्षे II. अक्लृपत् । अक्लृपताम् । अक्लृपन् ॥ 10. लृङ् । अकल्पिष्यत -- अक्लृप्स्यत ॥ परस्मैपदपक्षे -- अकल्प्स्यत् ॥

[१३७] क्षमूष् (क्षम्) = सहने। सक० । वेट् । आत्म० । to endure. 1. लट् । क्षमते ॥ 2. लोट् । क्षमताम् ॥ 3. लङ् । अक्षमत ॥ 4. विधि० । क्षमेत ॥ 5. लिट् । प्र० चक्षमे । चक्षमाते । चक्षमिरे ॥ म० चक्षमिषे--चक्षंसे । चक्षमाथे । चक्षमिध्वे--चक्षन्ध्वे ॥ उ० चक्षमे । चक्षमिवहे--चक्षण्वहे । चक्षमिमहे--चक्षण्महे ॥ 6. लुट् । प्र० क्षमिता--क्षन्ता ॥ म० क्षमितासे--क्षन्तासे ॥ उ० क्षमिताहे--क्षन्ताहे ॥ 7. लृट् । क्षमिष्यते--क्षंस्यते ॥ 8. आशी० । क्षमिषीष्ट--क्षंसीष्ट ॥ 9. लुङ् । XI. अक्षमिष्ट । अक्षमिषाताम् । अक्षमिषत ॥ अनिट्पक्षे--X. अक्षंस्त । अक्षंसाताम् । अक्षंसत ॥ 10. लृङ् । अक्षमिष्यत--अक्षंस्यत ॥

[१३८] गाहू (गाह्) = विलोडने । सक० । वेट् । आत्म० । to dive; to bathe. 1. लट् । गाहते ॥ 2. लोट् । गाहताम् ॥ 3. लङ् । अगाहत ॥ 4. विधि० । गाहेत ॥

In Public domain. Digitization Muthulakshmi Research Academy

5. लिट् । प्र० जगाहे । जगाहाते । जगाहिरे ॥ म० जगाहिषे--जघाक्षे । जगाहाथे । जगाहिध्वे–ढ्वे जघाड्ढ्वे ॥ उ० जगाहे । जगाहिवहे-- जगाह्वहे । जगाहिमहे–जगाह्महे ॥ 6. लुट् । गाहिता -- गाढा ॥ 7. लृट् । गाहिष्यते–घाक्ष्यते ॥ 8. आशी० । प्र० गाहिषीष्ट–घाक्षीष्ट ॥ म० गाहिषीध्वम् --ढ्वम् घाक्षीध्वम् ॥ 9. लुङ् । XI ; X. प्र० अगाहिष्ट--अगाढ । अगाहिषाताम्–अघाक्षाताम् । म० अगाहिध्वम्–ढ्वम्--अघाड्ढ्वम् ॥ 10. लृङ् । अगाहिष्यत-अघाक्ष्यत ॥

[१३९] शिक्ष = विद्योपादाने । सक० । सेट् । आत्म० । to learn ; to practice. 1. लट् । शिक्षते ॥ 2. लोट् । शिक्षताम् ॥ 3. लङ् । अशिक्षत ॥ 4. विधि० । शिक्षेत ॥ 5. लिट् । प्र० शिशिक्षे । शिशिक्षाते । शिशिक्षिरे ॥ म० शिशिक्षिषे । शिशिक्षाथे । शिशिक्षिध्वे ॥ उ० शिशिक्षे । शिशिक्षिवहे । शिशिक्षिमहे ॥ 6. लुट् । प्र० शिक्षिता । म० शिक्षितासे ॥ उ० शिक्षिताहे ॥ 7. लृट् शिक्षिष्यते ॥ 8. आशी० । प्र० शिक्षिषीष्ट । शिक्षिषीयास्ताम् । शिक्षिषीरन् ॥ म० शिक्षिषीष्ठाः ॥ उ० शिक्षिषीय । 9. लुङ् । XI. अशिक्षिष्ट । अशिक्षिषाताम् । अशिक्षिषत ॥ 10. लृङ् । अशिक्षिष्यत ॥

[१४०] भिक्ष = याच्ञायाम् । सक० । सेट् । आत्म० । to ask

n Public domain. Digitization Muthulakshmi Research Academ

for ; to beg. शिक्ष (१३९) धातुवत् ॥ भिक्षते ॥ बिभिक्षे ॥

[१४१] दीक्ष = मौण्ड्येज्योपनयननियमव्रतादेशेषु । अक० सक० । सेट् । आत्म० । to be shaved ; to perform a sacrifice, &c. शिक्ष (१३९) धातुवत् ॥ 1. लट् । दीक्षते ॥ 5. लिट् । प्र० दिदीक्षे । दिदीक्षाते । दिदीक्षिरे ॥ म० दिदीक्षिषे । दिदीक्षाथे । दिदीक्षिध्वे ॥ उ० दिदीक्षे । दिदीक्षिवहे । दिदीक्षिमहे ॥ 9. लुङ् । XI. अदीक्षिष्ट ॥

[१४२] ईक्ष = दर्शने । सक० । सेट् । आत्म० । to see. 1. लट् । ईक्षते । 2. लोट् । ईक्षताम् ॥ 3. लङ् । ऐक्षत ॥ 4. विधि० । ईक्षेत ॥ 5. लिट् । ईक्षांचक्रे । ईक्षांबभूव । ईक्षामास ॥ 9. लुङ् । XI. ऐक्षिष्ट । ऐक्षिषाताम् । ऐक्षिषत ॥

[१४३] टु भ्राश्रृ (भ्राश्) = दीप्तौ । अक० । सेट् । आत्म० । to shine. 1. लट् । भ्राशते- भ्राश्यते ॥ 2. लोट् । भ्राशताम्--भ्राश्यताम् ॥ 3. लङ् । अभ्राशत--अभ्राश्यत ॥ 4. विधि० । भ्राशेत--भ्राश्येत ॥ 5. लिट् । प्र० बभ्राशे । बभ्राशाते । बभ्राशिरे ॥ म० बभ्राशिषे । बभ्राशाथे । बभ्राशिध्वे ॥ उ० बभ्राशे । बभ्राशिवहे । बभ्राशिमहे ॥ पक्षे--प्र० भ्रेशे । भ्रेशाते । भ्रेशिरे ॥ म० भ्रेशिषे । भ्रेशाथे । भ्रेशिध्वे ॥

In Public domain. Digitization Muthulakshmi Research Academy

उ० ऐशे । ऐशिवहे । ऐशिमहे ॥ 6. लुट् । आशिता ॥ 7. लृट् । आशिष्यते ॥ 8. आशी० आशिषीष्ट । आशिषीयास्ताम् ॥ 9. लुङ् । XI. अआशिष्ट ॥

[१४४] डीङ् (डी) = विहायसा गतौ । अक० । सेट् । आत्म० । to fly; to pass through air. 1. लट् । डयते ॥ 2. लोट् । डयताम् ॥ 3. लङ् । अडयत ॥ 4. विधि० । डयेत ॥ 5. लिट् । प्र० डिड्ये । डिड्याते । डिड्यिरे ॥ म० । डिड्यिषे । डिड्याथे । डिड्यिध्वे ॥ उ० डिड्ये । डिड्यिवहे । डिड्यिमहे ॥ 9. लुङ् । XI. अडयिष्ट । अडयिषाताम् । अडयिषत ॥ म० अडयिध्वम्–ढ्वम् ॥

[१४५] ष्मिङ् (स्मि) = ईषद्धसने । अक० । अनि० । आत्म० । 1. लट् । स्मयते ॥ 2. लोट् । स्मयताम् ॥ 3. लङ् । अस्मयत ॥ 4. विधि० । स्मयेत ॥ 5. लिट् ॥ प्र० सिष्मिये । सिष्मियाते । सिष्मियिरे ॥ म० सिष्मियिषे । सिष्मियाथे । सिष्मियिध्वे-ढ्वे ॥ उ० सिष्मिये । सिष्मियिवहे । सिष्मियिमहे ॥ 6. लुट् । स्मेता ॥ 7. लृट् । स्मेष्यते ॥ 8. आशी० । स्मेषीष्ट ॥ 9. लुङ् । XI. अस्मेष्ट । अस्मेषाताम् । अस्मेषत ॥

[१४६] रभ=राभस्ये । सक० । अनि० । आत्म० । to begin; to desire; to act rashly. 1. लट् । रभते ॥ 2.

n Public domain. Digitization Muthulakshmi Research Academ

लोट् । रभताम् ॥ 3. लङ् । अरभत ॥ 4. विधि० । रभेत ॥ 5. लिट् । प्र० रेभे । रेभाते । रेभिरे ॥ म० रेभिषे । रेभाथे । रेभिध्वे ॥ उ० रेभे । रेभिवहे । रेभिमहे ॥ 6. लुट् । रब्धा ॥ 7. लृट् । रप्स्यते ॥ 8. आशी० । रप्सीष्ट ॥ 9. लुङ् । X. अरब्ध । अरप्साताम् । अरप्सत ॥ 10. लृङ् अरप्स्यत ॥

[१४७] डु लभष् (लभ्) = प्राप्तौ । सक० । अनि० । आत्म० । to get; to obtain. रभ (१४६) धातुवत् । 1. लट् । लभते ॥ 2. लोट् । लभताम् । ॥ 3. लङ् । अलभत ॥ 4. विधि० । लभेत ॥ 5. लिट् । लेभे । लेभाते । लेभिरे ॥ 6. लुट् । लब्धा ॥ 7. लृट् । लप्स्यते ॥ 8. आशी० । लप्सीष्ट ॥ 9. लुङ् । X. अलब्ध । अलप्साताम् ॥

[१४८] षहृ (सह्)=मर्षणे । सक० । सेट् । आत्म० । to endure; to suffer; to forbear. दध (१२१) धातुवत् । 5. लिट् । प्र० सेहे । सेहाते । सेहिरे ॥ म० सेहिषे । सेहाथे । सेहिध्वे – ढ्वे ॥ उ० सेहे । सेहिवहे । सेहिमहे ॥ 6. लुट् । सहिता – सोढा ॥ 7. लृट् । सहिष्यते ॥ 9. XI. लुङ् । असहिष्ट ॥ म० असहिध्वम्–ढ्वम् ॥

[१४९] स्रंसु (स्रंस्) = अवस्रंसने । अक० । सेट् । आत्म० ।

In Public domain. Digitization Muthulakshmi Research Academy

to drop to down. 1. लट्। स्रंसते ॥ 2. लोट्। स्रंसताम् ॥ 3. लङ् । अस्रंसत ॥ 4. विधि० । स्रंसेत ॥ 5. लिट् । प्र० सस्रंसे। सस्रंसाते । सस्रंसिरे ॥ म० सस्रंसिषे । सस्रंसाथे । सस्रंसिध्वे ॥ उ० सस्रंसे । सस्रंसिवहे । सस्रंसिमहे ॥ 6. लुट्। स्रंसिता ॥ 7. लृट्। स्रंसिष्यते ॥ 8. आशी० । स्रंसिषीष्ट ॥ 9. लुङ्। XI. अस्रंसिष्ट । अस्रंसिषाताम् । अस्रंसिषत ॥ पक्षे । II. अस्रसत् । अस्रसताम् । अस्रसन् ॥

[१५०] ध्वंसु (ध्वंस्) = अवस्रंसने । स्रंसु (१४९) धातुवत् ॥

[१५१] ष्टभि (स्तंभ्) = प्रतिबन्धे । अक० । सेट् । आत्म० । to stop; to hinder. स्तंभते ॥ 5. लिट् । तस्तंभे ॥ तस्तंभाते ॥ 9. लुङ् । XI. अस्तंभिष्ट । अस्तंभिषाताम् ॥

[१५२] लघि (लङ्घ्) = गतौ भोजननिवृत्तौ च । सक० । सेट् । आत्म० । to go; to transgress; to fast. वदि (११५) धातुवत् ॥

[१५३] टु वेपृ (वेप्) = कंपने । अक० । सेट् । आत्म० । to tremble. 1. लट् । वेपते ॥ 2. लोट् । वेपताम् ॥ 3. लङ् । अवेपत ॥ 4. विधि० वेपेत ॥ 5. लिट् । प्र० विवेपे । विवेपाते । विवेपिरे ॥ म० विवेपिषे । विवेपाथे । विवेपिध्वे ॥ उ० विवेपे । विवेपिवहे । विवेपिमहे ॥

n Public domain. Digitization Muthulakshmi Research Academ

6. लुट्। वेपिता ॥ 7. लृट्। वेपिष्यते ॥ 8. आशी० वेपिषीष्ट ॥ 9. लुङ्। XI. अवेपिष्ट ॥

[१५४] षेवृ (सेव्) = सेवने। सक०। सेट्। आत्म०। to serve; to enjoy. 1. सेवते इत्यादि। वेपृ (१५३) धातुवत् ॥ 5. लिट्। सिषेवे ॥ म० सिषेविध्वे--ढ्वे ॥ 9. लुङ्। XI. असेविष्ट ॥ म० असेविध्वम्--ढ्वम् ॥

[१५५] देवृ (देव्) = देवने। अक०। सेट्। आत्म०। to sport; to lament. षेवृ (१५४) धातुवत् ॥

[१५६] वेष्ट = वेष्टने। सक०। सेट्। आत्म०। to surround. वेपृ (१५३) धातुवत् ॥

[१५७] चेष्ट = चेष्टायाम्। अक०। सेट्। आत्म०। to stir; to make efforts. वेपृ (१५३) धातुवत् ॥

[१५८] वृतु (वृत्) = वर्तने। अक०। सेट्। आत्म०। to exist; to happen; to live on. 1. लट्। वर्तते ॥ 2. लोट्। वर्तताम् ॥ 3. लङ्। अवर्तत ॥ 4. विधि०। वर्तेत ॥ 5. लिट्। ववृते। ववृताते। ववृतिरे ॥ 6. लुट्। प्र० वर्तिता ॥ म० वर्तितासे ॥ उ० वर्तिताहे ॥ 7. लृट्। वर्तिष्यते वर्तिष्येते। वर्तिष्यन्ते ॥ परस्मैपदपक्षे--वर्त्स्यति। वर्त्स्यतः। वर्त्स्यन्ति ॥ 9. लुङ्। XI. अवर्तिष्ट। अवर्तिषाताम्।

In Public domain. Digitization Muthulakshmi Research Academy

अवर्तिषत ॥ परस्मैपदपक्षे—II. अवृतत् । अवृतताम् । अवृतन् ॥ 10. लृङ् । अवर्तिष्यत-अवर्त्स्यत् ॥

[१५९] वृधु (वृध्) = वृद्धौ । अक० । सेट् । आत्म० । to grow. वृतु (१५८) धातुवत् ॥

[१६०] शसि (शंस्) आङ्पूर्वः । इच्छायाम् । सक० । सेट् । आत्म० । to hope; to bless. आशंसते इत्यादि वदि (११५) धातुवत् ॥

[१६१] ऋज = गतिस्थानार्जनोपार्जनेषु । सक० । सेट् । आत्म० । to go; to acquire. 1. लट् । अर्जते ॥ 2. लोट् । अर्जताम् ॥ 3. लङ् । आर्जत ॥ 4. विधि० । अर्जेत ॥ 5. लिट् । प्र० आनृजे । आनृजाते । आनृजिरे ॥ म० आनृजिषे । आनृजाथे । आनृजिध्वे ॥ उ० आनृजे । आनृजिवहे । आनृजिमहे ॥ 6. लुट् । अर्जिता ॥ 7. लृट् । अर्जिष्यते ॥ 8. आशी० अर्जिषीष्ट ॥ म० अर्जिषीध्वम् ॥ 9. लुङ् । XI. आर्जिष्ट । आर्जिषाताम् । आर्जिषत ॥ आर्जिध्वम्—ढ्वम् ॥

[१६२] जृभि (जृंभ्) = गात्रविनामे । अक० । सेट् । आत्म० । to yawn. 1. लट् । जृंभते ॥ 5. लिट् । जजृंभे । जजृंभाते ॥ 8. आशी० । जृंभिषीष्ट ॥ 9. लुङ् । XI. अजृंभिष्ट ॥

इति भ्वादावात्मनेपदिनः ।

n Public domain. Digitization Muthulakshmi Research Academ

अथ भ्वादावुभयपदिनः ।

[१६३] राजृ (राज्) दीप्तौ । अक० । सेट् । उभ० । to shine. परस्मैपदे—1. लट् । राजति ॥ 2. लोट् । राजतु ॥ 3. लङ् । अराजत् ॥ 4. विधि० । राजेत् ॥ 5. लिट् । प्र० रराज । रराजतुः—रेजतुः । रराजुः—रेजुः ॥ म० रराजिथ—रेजिथ । रराजथुः--रेजथुः । रराज--रेज ॥ उ० रराज । रराजिव—रेजिव । रराजिम—रेजिम ॥ 6. लुट् । प्र० राजिता ॥ म० राजितासि ॥ 7. लृट् । राजिष्यति ॥ 8. आशी० । राज्यात् । राज्यास्ताम् ॥ 9. लुङ् । VII. अराजीत् । अराजिष्टाम् । अराजिषुः । 10. लृङ् । अराजिष्यत् ॥ आत्मनेपदे—1. लट् । राजते ॥ 2. लोट् । राजताम् ॥ 3. लङ् । अराजत ॥ 4. विधि० । राजेत ॥ 5. लिट् । प्र० रेजे । रेजाते । रेजिरे ॥ म० रेजिषे । रेजाथे । रेजिध्वे ॥ उ० रेजे । रेजिवहे । रेजिमहे ॥ पक्षे—रराजे । रराजाते । रराजिरे । इत्यादि ॥ 6. लुट् । राजिता । म० राजितासे ॥ 7. लृट् । राजिष्यते ॥ 8. आशी० । राजिषीष्ट ॥ 9. लुङ् । XI. अराजिष्ट । अराजिषाताम् ॥ 10. लृङ् । अराजिष्यत ॥

In Public domain. Digitization Muthulakshmi Research Academy

[१६४] टु याचृ (याच्) = याच्ञायाम् । सक० । सेट् । उभ० । to beg. 1. लट् । याचति–याचते इत्यादि राजृ (१६३) वत् ॥ किं तु लिटि एत्वाभ्यासलोपौ न स्तः । ययाचे । ययाचाते । ययाचिरे ॥ इत्यादि ॥

[१६५] श्रिञ् (श्रि) = सेवायाम् । सक० । सेट् । उभ० । to depend upon; to cling. परस्मैपदे—1. लट् । श्रयति ॥ 2. लोट् । श्रयतु ॥ 3. लङ् । अश्रयत् ॥ 4. विधि० । श्रयेत् ॥ 5. लिट् । प्र० शिश्राय । शिश्रियतुः । शिश्रियुः ॥ म० शिश्रयिथ । शिश्रियथुः । शिश्रिय ॥ उ० शिश्राय–शिश्रय । शिश्रियिव । शिश्रियिम ॥ 6. लुट् । प्र० श्रयिता ॥ म० श्रयितासि ॥ 7. लृट् । श्रयिष्यति ॥ 8. आशी० । श्रीयात् । श्रीयास्ताम् ॥ 9. लुङ् । III. प्र० अशिश्रियत् ॥ 10. लृङ् । अश्रयिष्यत् ॥ आत्मनेपदे--1. लट् । श्रयते ॥ 2. लोट् । श्रयताम् ॥ 3. लङ् । अश्रयत ॥ 4. विधि० । श्रयेत ॥ 5. लिट् । प्र० शिश्रिये । शिश्रियाते । शिश्रियिरे ॥ म० शिश्रियिषे ॥ शिश्रियाथे । शिश्रियिध्वे--ढ्वे ॥ उ० शिश्रिये । शिश्रियिवहे । शिश्रियिमहे ॥ 6. लुट् । श्रयिता ॥ श्रयितासे ॥ 7. लृट् । श्रयिष्यते ॥ 8. आशी० । श्रयिषीष्ट ॥ 9. लुङ् । IX. अशिश्रियत । अशिश्रियेताम् । अशिश्रियन्त ॥ 10. लृङ् । अश्रयिष्यत ॥

n Public domain. Digitization Muthulakshmi Research Academ

[१६६] धृञ् (धृ) = धारणे । सक० । अनि० । उभ० । to hold. 1. लट् । धरति ॥ 2. लोट् । धरतु ॥ 3. लङ् । अधरत् ॥ 4. विधि० । धरेत् ॥ 5. लिट् । प्र० दधार । दध्रतुः । दध्रुः ॥ म० दधर्थ । दध्रथुः । दध्र ॥ उ० दधार– दधर । दध्रिव । दध्रिम ॥ 6. लुट् । धर्तासि ॥ 7. लृट् । धरिष्यति ॥ 8. आशी० । ध्रियात् । ध्रियास्ताम् ॥ 9. लुङ् । VI. प्र० अधार्षीत् । अधार्ष्टाम् । अधार्षुः ॥ म० अधार्षीः । अधार्ष्टम् । अधार्ष्ट ॥ उ० अधार्षम् । अधार्ष्व । अधार्ष्म ॥ 10. लृङ् । अधरिष्यत् ॥

आत्मनेपदे—1. लट् । धरते ॥ 2. लोट् । धरताम् ॥ 3. लङ् । अधरत ॥ 4. विधि० । धरेत ॥ 5. लिट् । प्र० दध्रे । दध्राते । दध्रिरे ॥ म० दध्रिषे । दध्राथे । दध्रिध्वे ॥ उ० दध्रे । दध्रिवहे । दध्रिमहे ॥ 6. लुट् । प्र० धर्ता ॥ म० धर्तासे ॥ 7. लृट् । धरिष्यते ॥ 8. आशी० । प्र० धृषीष्ट । धृषीयास्ताम् ॥ म० धृषीष्ठाः । धृषीयास्थाम् । धृषीढ्वम् । 9. लुङ् । X. प्र० अधृत । अधृषाताम् । अधृषत ॥ म० अधृथाः । अधृषाथाम् । अधृढ्वम् ॥ उ० अधृषि । अधृष्वहि । अधृष्महि 10. लृङ् । अधरिष्यत ॥

[१६७] हृञ् (हृ) = हरणे । सक० । अनि० । उभ० । to take; to lead; to draw to a distance; to deprive

In Public domain. Digitization Muthulakshmi Research Academy

of; to win; to obtain. धृ (१६६) धातुवत् । परस्मैपदे— 5. लिट् । प्र० जहार । जह्रतुः । जह्रुः ॥ म० जहर्थ । जह्रथुः । जह्र ॥ उ० जहार-जहर । जह्रिव । जह्रिम ॥ 9. लुङ् । VI. अहार्षीत् ॥ 10. लृङ् । अहरिष्यत् ॥

आत्मनेपदे–5. लिट् । प्र० जह्रे । जह्राते । जह्रिरे ॥ म० जह्रिषे । जह्राथे । जह्रिध्वे--ढ्वे ॥ उ० जह्रे । जह्रिवहे । जह्रिमहे ॥ 9. लुङ् । X. अहृत ॥ अहृढ्वम् ॥

[१६८] भृञ् (भृ) = भरणे । सक० । अनि० । उभ० । to fill; to nourish. धृ (१६६) धातुवत् । परस्मैपदे—5. लिट् । प्र० बभार । बभ्रतुः । बभ्रुः ॥ म० बभर्थ । बभ्रथुः । बभ्र ॥ उ० बभार–बभर । बभृव । बभृम ॥ 9. लुङ् । VI. अभार्षीत् । आत्मनेपदे—5. लिट् । बभ्रे । बभ्राते । बभ्रिरे ॥ म० बभ्रिध्वे–ढ्वे ॥ 9. लुङ् । X. अभृत । अभृषाताम् । अभृषत ॥ म० अभृढ्वम् ॥

[१६९] णीञ् (नी) = प्रापणे । द्विक० । अनि० । उभ० । to lead; to carry; to bring; to pass. परस्मैपदे—1. लट् । नयति ॥ 2. लोट् । नयतु--नयतात् । 3. लङ् । अनयत् ॥ 4. विधि० । नयेत् ॥ 5. लिट् । प्र० निनाय । निन्यतुः । निन्युः ॥ म० निनयिथ–निनेथ । निन्यथुः । निन्य ॥ उ० निनाय–निनय । निन्यिव ।

n Public domain. Digitization Muthulakshmi Research Academy

निन्यिम ॥ 6. लुट् । नेता ॥ 7. लृट् । नेष्यति ॥ 8. आशी० । नीयात् । नीयास्ताम् ॥ 9. लुङ् । VI. प्र० अनैषीत् । अनैष्टाम् ॥ 10. लृङ् । अनेष्यत् ॥

आत्मनेपदे—1. लट् । नयते ॥ 2. लोट् । नयताम् । नयेताम् ॥ 3. लङ् । अनयत । अनयेताम् ॥ 4. विधि० । नयेत । नयेयाताम् । नयेरन् ॥ 5. लिट् । प्र० निन्ये । निन्याते । निन्यिरे ॥ म० निन्यिषे । निन्याथे । निन्यिध्वे-ढ्वे ॥ उ० निन्ये । निन्यिवहे । निन्यिमहे ॥ 6. लुट् । नेता । नेतासे ॥ 7. लृट् । नेष्यते ॥ 8. आशी० । नेषीष्ट । नेषीयास्ताम् । नेषीरन् ॥ 9. लुङ् । X. प्र० अनेष्ट । अनेषाताम् । अनेषत ॥ म० अनेढ्वम् ॥ 10. लृङ् । अनेष्यत ॥

इति भ्वादावुभयपदिनः ।

भ्वादयश्च संपूर्णाः ॥ १ ॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रीगणेशाय नमः ।

मध्यमधातुरूपावल्याम् ।

अदादयः ॥ २ ॥

तत्र परस्मैपदिनः ।

[१७०] अद्=भक्षणे । सक० । अनि० । पर० । to eat. 1. लट् । प्र० अत्ति । अत्तः । अदन्ति ॥ म० अत्सि । अत्थः । अत्थ ॥ उ० अद्मि । अद्वः । अद्मः ॥ 2. लोट् । प्र० अत्तु-अत्तात् । अत्ताम् । अदन्तु ॥ म० अद्धि-अत्तात् । अत्तम् । अत्त ॥ उ० अदानि । अदाव । अदाम ॥ 3. लङ् । प्र० आदत् । आत्ताम् । आदन् ॥ म० आदः । आत्तम् । आत्त ॥ उ० आदम् । आद्व । आद्म ॥ 4. विधि० । प्र० अद्यात् । अद्याताम् । अद्युः ॥ म० अद्याः । अद्यातम् । अद्यात ॥ उ० अद्याम् । अद्याव । अद्याम ॥

n Public domain. Digitization Muthulakshmi Research Academ

5. लिट् । प्र० जघास । जक्षतुः । जक्षुः ॥ म० जघसिथ । जक्षथुः । जक्ष ॥ उ० जघास–जघस । जक्षिव । जक्षिम ॥ पक्षे–प्र० आद । आदतुः । आदुः ॥ म० आदिथ । आदथुः । आद ॥ उ० आद । आदिव । आदिम ॥ 6. लुट् । प्र० अत्ता । अत्तारौ । अत्तारः ॥ म० अत्तासि । अत्तास्थः । अत्तास्थ ॥ उ० अत्तास्मि । अत्तास्वः । अत्तास्मः ॥ 7. लृट् । प्र० अत्स्यति । अत्स्यतः । अत्स्यन्ति ॥ म० अत्स्यसि । अत्स्यथः । अत्स्यथ ॥ उ० अत्स्यामि । अत्स्यावः । अत्स्यामः ॥ 8. आशी० । प्र० अद्यात् । अद्यास्ताम् । अद्यासुः ॥ म० अद्याः । अद्यास्तम् । अद्यास्त ॥ उ० अद्यासम् । अद्यास्व । अद्यास्म ॥ 9. लुङ् । II. प्र० अघसत् । अघसताम् । अघसन् ॥ म० अघसः । अघसतम् । अघसत ॥ उ० अघसम् । अघसाव । अघसाम ॥ 10. लृङ् । प्र० आत्स्यत् । आत्स्यताम् । आत्स्यन् ॥ म० आत्स्यः । आत्स्यतम् । आत्स्यत ॥ उ० आत्स्यम् । आत्स्याव । आत्स्याम ॥

[१७१] हन = हिंसागत्योः । सक० । अनि० । वधादेशस्तु सेट् । पर० । to kill. 1. लट् । प्र० हन्ति । हतः । घ्नन्ति । म० हंसि । हथः । हथ ॥ उ० हन्मि । हन्वः । हन्मः ॥ 2. लोट् । प्र० हन्तु–हतात् । हताम् । घ्नन्तु ॥ म० जहि–हतात् ।

In Public domain. Digitization Muthulakshmi Research Academy

हतम् । हत ॥ उ० हनानि । हनाव । हनाम ॥ 3. लङ् । प्र० अहन् । अहताम् । अघ्नन् ॥ म० अहन् । अहतम् । अहत ॥ उ० अहनम् । अहन्व । अहन्म ॥ 4. विधि० । प्र० हन्यात् । हन्याताम् । हन्युः । म० हन्याः । हन्यातम् । हन्यात ॥ उ० हन्याम् । हन्याव । हन्याम ॥

5. लिट् । प्र० जघान । जघ्नतुः । जघ्नुः ॥ म० जघनिथ--जघन्थ । जघ्नथुः । जघ्न । उ० जघान--जघन । जघ्निव । जघ्निम ॥ 6. लुट् । प्र० हन्ता ॥ म० हन्तासि ॥ उ० हन्तास्मि ॥ 7. लृट् । प्र० हनिष्यति ॥ म० हनिष्यसि ॥ उ० हनिष्यामि ॥ 8. आशी० । प्र० वध्यात् । वध्यास्ताम् । वध्यासुः ॥ म० वध्याः । वध्यास्तम् । वध्यास्त ॥ उ० वध्यासम् ॥ 9. लुङ् । VII. प्र० अवधीत् । अवधिष्टाम् । अवधिषुः ॥ म० अवधीः । अवधिष्टम् । अवधिष्ट ॥ उ० अवधिषम् ॥ 10. लृङ् । अहनिष्यत् ॥

[१७२] वच = परिभाषणे । द्विक० । अनि० । पर० । to speak. 1. लट् । प्र० वक्ति । वक्तः । ० ॥ म० वक्षि । वक्थः । वक्थ ॥ उ० वच्मि । वच्वः । वच्मः ॥ 2. लोट् । प्र० वक्तु-वक्तात् । वक्ताम् । वचन्तु ॥ म० वग्धि--वक्तात् । वक्तम् । वक्त ॥ उ० वचानि । वचाव । वचाम ॥ 3. लङ् । प्र० अवक्--ग् । अवक्ताम् । अवचन् ॥ म० अवक्--ग् । अवक्तम् ।

n Public domain. Digitization Muthulakshmi Research Academ

अवक्त ॥ उ० अवचम् । अवच्व । अवच्म ॥ 4. विधि० । वच्यात् । वच्याताम् । वच्युः ॥ 5. लिट् । प्र० उवाच । ऊचतुः । ऊचुः ॥ म० उवचिथ--उवक्थ । ऊचथुः । ऊच ॥ उ० उवाच--उवच । ऊचिव । ऊचिम ॥ 6. लुट् । वक्ता ॥ 7. लृट् । वक्ष्यति ॥ 8. आशी० । उच्यात् । उच्यास्ताम् ॥ 9. लुङ् । II. प्र० अवोचत् । अवोचताम् । अवोचन् ॥ म० अवोचः । अवोचतम् । अवोचत ॥ उ० अवोचम् । अवोचाव । अवोचाम ॥ 10. लृङ् । अवक्ष्यत् ॥

[१७३] विद = ज्ञाने । सक० । सेट् । पर० । to know; to regard. 1. लट् । प्र० वेत्ति । वित्तः । विदन्ति ॥ म० वेत्सि । वित्थः । वित्थ ॥ उ० वेद्मि । विद्वः । विद्मः ॥ पक्षे—प्र० वेद । विदतुः । विदुः ॥ म० वेत्थ । विदथुः । विद ॥ उ० वेद । विद्व । विद्म ॥ 2. लोट् । प्र० वेत्तु—वित्तात् । वित्ताम् । विदन्तु ॥ म० विद्धि—वित्तात् । वित्तम् । वित्त ॥ उ० वेदानि । वेदाव । वेदाम ॥ पक्षे—प्र० विदांकरोतु—विदांकुरुतात् । विदांकुरुताम् । विदांकुर्वन्तु ॥ म० विदांकुरु—तात् । विदांकुरुतम् । विदांकुरुत ॥ उ० विदांकरवाणि । विदांकरवाव । विदांकरवाम ॥ 3. लङ् । प्र० अवेत्-द् । अवित्ताम् । अविदुः । म० अवेः—अवेत्--द् । अवित्तम् । अवित्त ॥ उ० अवेदम् । अविद्व । अविद्म ॥ 4. विधि० । विद्यात् । विद्याताम् । विद्युः ॥

In Public domain. Digitization Muthulakshmi Research Academy

5. लिट्। प्र० विवेद। विविदतुः। विविदुः॥ म० विवेदिथ। विविदथुः। विविद॥ उ० विवेद। विविदिव। विविदिम॥ पक्षे—विदांचकार—विदांबभूव--विदामास इत्यादि॥ 6. लुट्। वेदिता॥ 7. लृट्। वेदिष्यति॥ 8. आशी०। विद्यात्। विद्यास्ताम्॥ 9. लुङ्। VII. अवेदीत्। अवेदिष्टाम्। अवेदिषुः॥ 10. लृङ्। अवेदिष्यत्॥

[१७४] अस = भुवि। अक०। सेट्। पर०। to be. 1. लट्। प्र० अस्ति। स्तः। सन्ति॥ म० असि। स्थः। स्थ॥ उ० अस्मि। स्वः। स्मः॥ 2. लोट् प्र० अस्तु—स्तात्। स्ताम्। सन्तु॥ म० एधि--स्तात्। स्तम्। स्त॥ उ० असानि। असाव। असाम॥ 3. लङ्। प्र० आसीत्। आस्ताम्। आसन्॥ म० आसीः। आस्तम्। आस्त॥ उ० आसम्। आस्व। आस्म॥ 4. विधि०। प्र० स्यात्। स्याताम्। स्युः॥ म० स्याः। स्यातम्। स्यात॥ उ० स्याम्। स्याव। स्याम॥ 5. लिट्। (आर्धधातुके) बभूव। बभूवतुरित्यादीनि भूधातो रूपाणि। 6. लुट्। भविता॥ 7. लृट्। भविष्यति॥ 8. आशी०। भूयात्। भूयास्ताम्॥ 9. लुङ् I.। अभूत्॥ 10. लृङ्। अभविष्यत्॥

[१७५] ञि ष्वप् (स्वप्) = शयने। अक०। अनि०। पर०। to sleep; to repose. 1. लट्। प्र० स्वपिति।

In Public domain. Digitization Muthulakshmi Research Academy

स्वपितः । स्वपन्ति ॥ म० स्वपिषि । स्वपिथः । स्वपिथ ॥ उ० स्वपिमि । स्वपिवः । स्वपिमः ॥ 2. लोट् । प्र० स्वपितु--स्वपितात् । स्वपिताम् । स्वपन्तु ॥ म० स्वपिहि--स्वपितात् । स्वपितम् । स्वपित । उ० स्वपानि । स्वपाव । स्वपाम ॥ 3. लङ् । प्र० अस्वपीत्--अस्वपत् । अस्वपिताम् । अस्वपन् ॥ म० अस्वपीः--अस्वपः । अस्वपितम् । अस्वपित ॥ उ० अस्वपम् । अस्वपिव । अस्वपिम ॥ 4. विधि० । स्वप्यात् । स्वप्याताम् ॥ 5. लिट् । प्र० सुष्वाप । सुषुपतुः । सुषुपुः ॥ म० सुष्वपिथ--सुष्वप्थ । सुषुपथुः । सुषुप ॥ उ० सुष्वाप--सुष्वप । सुषुपिव । सुषुपिम ॥ 6. लुट् । स्वप्ता ॥ 7. लृट् । स्वप्स्यति ॥ 8. आशी० । सुप्यात् । सुप्यास्ताम् । सुप्यासुः ॥ 9. लुङ् । VI. प्र० अस्वाप्सीत् । अस्वाप्ताम् । अस्वाप्सुः ॥ म० अस्वाप्सीः । अस्वाप्तम् । अस्वाप्त ॥ उ० अस्वाप्सम् । अस्वाप्स्व । अस्वाप्स्म ॥ 10. लृङ् । अस्वप्स्यत् ॥

[१७६] रुदिर् (रुद्) = अश्रुविमोचने । अक० । सेट् । पर० । to cry; to weep. 1. लट् । प्र० रोदिति । रुदितः । रुदन्ति ॥ म० रोदिषि । रुदिथः । रुदिथ ॥ उ० रोदिमि । रुदिवः । रुदिमः ॥ 2. लोट् । प्र० रोदितु—रुदितात् । रुदिताम् । रुदन्तु ॥ म० रुदिहि—रुदितात् । रुदितम् । रुदित ॥ उ० रोदानि । रोदाव । रोदाम ॥ 3. लङ् । प्र०

In Public domain. Digitization Muthulakshmi Research Academy

अरोदीत्—अरोदत् । अरुदिताम् । अरुदन् ॥ म० अरोदीः-अरोदः । अरुदितम् । अरुदित ॥ उ० अरोदम् । अरुदिव । अरुदिम ॥ 4. विधि० रुद्यात् । रुद्याताम् ॥ 5. लिट् । प्र० रुरोद । रुरुदतुः । रुरुदुः ॥ म० रुरोदिथ । रुरुदथुः । रुरुद ॥ उ० रुरोद । रुरुदिव । रुरुदिम ॥ 6. लुट् । रोदिता ॥ 7. लृट् । रोदिष्यति ॥ 8. आशी० । रुद्यात् । रुद्यास्ताम् ॥ 9. लुङ् । VII. अरोदीत् । अरोदिष्टाम् । अरोदिषुः ॥ पक्षे—II. अरुदत् । अरुदताम् । अरुदन् ॥ 10. लृङ् । अरोदिष्यत् ।

[१७७] श्वस = प्राणने । अक० । सेट् । पर० । to breathe; to sigh; to hiss. 1. लट् । प्र० श्वसिति । श्वसितः । श्वसन्ति ॥ म० श्वसिषि । श्वसिथः । श्वसिथ ॥ उ० श्वसिमि । श्वसिवः । श्वसिमः ॥ 2. लोट् । प्र० श्वसितु--श्वसितात् । श्वसिताम् । श्वसन्तु ॥ म० श्वसिहि--श्वसितात् । श्वसितम् । श्वसित ॥ उ० श्वसानि ॥ 3. लङ् । प्र० अश्वसीत्--अश्वसत् । अश्वसिताम् । अश्वसन् ॥ म० अश्वसीः--अश्वसः । अश्वसितम् । अश्वसित ॥ उ० अश्वसम् । अश्वसिव । अश्वसिम ॥ 4. विधि० । श्वस्यात् । श्वस्याताम् ॥

5. लिट् । प्र० शश्वास । शश्वसतुः । शश्वसुः ॥ म० शश्वसिथ । शश्वसथुः । शश्वस ॥ उ० शश्वास--शश्वस । शश्व-

In Public domain. Digitization Muthulakshmi Research Academy

सिव ॥ 6. लुट् । श्वसिता ॥ 7. लृट् । श्वसिष्यति ॥ 8. आशी० । श्वस्यात् । श्वस्यास्ताम् ॥ श्वस्यासुः 9. लुङ् । VII. अश्वसीत् । अश्वसिष्टाम् । अश्वसिषुः ॥ 10. लृङ् । अश्वसिष्यत् ॥

[१७८] अन = प्राणने । अक० । सेट् । पर० । to live.
1. लट् । प्र० अनिति ॥ म० अनिषि ॥ उ० अनिमि ॥ 2. लोट् । प्र० अनितु ॥ म० अनिहि ॥ उ० अनानि ॥ 3. लङ् । प्र० आनीत्--आनत् । आनिताम् । आनन् ॥ म० आनीः--आनः । आनितम् । आनित ॥ उ० आनम् । आनिव । आनिम ॥ 4. विधि० । अन्यात् । अन्याताम् ॥ 5. लिट् । प्र० आन । आनतुः । आनुः ॥ म० आनिथ । आनथुः । आन ॥ उ० आन । आनिव । आनिम ॥ 6. लुट् । अनिता ॥ 7. लृट् । अनिष्यति ॥ 8. आशी० । अन्यात् । अन्यास्ताम् ॥ 9. लुङ् । VII. आनीत् । आनिष्टाम् ॥ 10. लृङ् । आनिष्यत् ॥

[१७९] जक्ष = भक्षणहसनयोः । भक्षणे सक० । सेट् । पर० । to eat ; to laugh. 1. लट् । प्र० जक्षिति । जक्षितः । जक्षति ॥ म० जक्षिषि । जक्षिथः । जक्षिथ ॥ उ० जक्षिमि । जक्षिवः । जक्षिमः ॥ 2. लोट् । प्र० जक्षितु--तात् । जक्षिताम् । जक्षतु ॥ म० जक्षिहि--तात् । जक्षितम् ।

In Public domain. Digitization Muthulakshmi Research Academy

जक्षित ॥ उ० जक्षाणि । जक्षाव । जक्षाम ॥ 3. लङ् । प्र० अजक्षीत्—अजक्षत् । अजक्षिताम् । अजक्षुः ॥ म० अजक्षीः-अजक्षः । अजक्षितम् । अजक्षित ॥ उ० अजक्षम् । अजक्षिव । अजक्षिम ॥ 4. विधि० । जक्ष्यात् । जक्ष्याताम् ॥ 5. लिट् । प्र० जजक्ष । जजक्षतुः । जजक्षुः ॥ म० जजक्षिथ । जजक्षथुः । जजक्ष ॥ उ० जजक्ष । जजक्षिव । जजक्षिम ॥ 6. लुट् । जक्षिता ॥ 7. लृट् । जक्षिष्यति ॥ 8. आशी० । जक्ष्यात् । जक्ष्यास्ताम् ॥ 9. लुङ् । VII. अजक्षीत् । अजक्षिष्टाम् ॥ 10. लृङ् । अजक्षिष्यत् ॥

[१८०] मृजू (मृज्) = शुद्धौ । सक० । वेट् । पर० । to wipe off; to clear. 1. लट् । प्र० मार्ष्टि । मृष्टः । मृजन्ति—मार्जन्ति ॥ म० मार्क्षि । मृष्ठः । मृष्ठ ॥ उ० मार्ज्मि । मृज्वः । मृज्मः ॥ 2. लोट् । प्र० मार्ष्टु--मृष्टात् । मृष्टाम् । मृजन्तु--मार्जन्तु ॥ म० मृड्ढि--मृष्टात् । मृष्टम् । मृष्ट ॥ उ० मार्जानि ॥ 3. लङ् । प्र० अमार्ट्-ड् । अमृष्टाम् । अमृजन्--अमार्जन् ॥ म० अमार्ट्-ड् । अमृष्टम् । अमृष्ट ॥ उ० अमार्जम् । अमृज्व । अमृज्म ॥ 4. विधि० । प्र० मृज्यात् । मृज्याताम् । मृज्युः ॥

5. लिट् । प्र० ममार्ज । ममार्जतुः—ममृजतुः । ममार्जुः—

In Public domain. Digitization Muthulakshmi Research Academy

ममृजुः ॥ म० ममार्जिथ--ममार्ष्ठ । ममार्जथुः--ममृजथुः । ममार्ज--ममृज ॥ उ० ममार्ज । ममृजिव--ममार्जिव--ममृज्व । ममृजिम--ममार्जिम--ममृज्म ॥ 6. लुट् । मार्जिता--मार्ष्टा ॥ 7. लृट् । मार्जिष्यति--मार्क्ष्यति ॥ 8. आशी० । मृज्यात् । मृज्यास्ताम् ॥ 9. लुङ् । VII. प्र० अमार्जीत् ॥ पक्षे--VI. अमार्क्षीत् ॥ 10. लृङ् । अमार्जिष्यत्-अमार्क्ष्यत् ॥

[१८१] जागृ = निद्राक्षये । अक० । सेट् । पर० । to awake.

